श्रीलौगाक्षिकुलारविन्दतरणिर्माध्यन्दिनी केशवः ।

यं प्रासूत सदाशिवाङ्घ्रिकमलद्वन्द्वैकनिष्ठं परं
भट्टानन्तमहं नमामि पितरं साम्बं कृपाम्भोनिधिम् ॥

सकलन्यायसिद्धान्तमवगम्य यथामति ।
भट्टश्रीकेशवेनैषा क्रियते तर्कदीपिका ॥

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं इष्टदेवता-निर्देशात्मकं मङ्गलमाचरन् प्रेक्षावत्प्रवृत्तये विषयादि दर्शयति । बालोऽपीति । हे अन्वितमयान्यायशास्त्राभिज्ञतया प्रसिद्धेन केशवमिश्रेण तर्कभाषा(?)। तर्क्यन्ते विचार्यन्त इति तर्काः । षोडशपदार्थाः । ते भाष्यन्ते प्रतिपाद्यन्ते अनयेति तर्कभाषा । गौतमप्रणीतसूत्रसन्दर्भरूपा न्यायविद्या प्रकाश्यते । तर्कशब्दस्य पदार्थमात्रवाचकस्य ईश्वरवाचकतया स्वरूपनिर्देशात्मकं मङ्गलमुपनिबद्धं भवति ।

End:

कुठारादौ व्यभिचारवारणाय ज्ञानेति । दृष्टान्तासिद्धिवारणाय विशेष....व्यभिचारवारणाय विशेष्यभागप्रविष्टव्यापार........ ।

Subject: Tarkabhāṣādīpikā; Up to śabda.

Remarks:—The Ms. is in a fairly good condition. On the title page is given

तर्कदीपिका वरखेडि रङ्गाचार्य.... ।

Nothing more is known of this Lāugākṣi Keśavabhaṭṭa than what can be called from the first verse. He belonged to the

Laugākṣi family. His father was Bhaṭṭānanta and Grand-father, Keśava.

॥ तर्कभाषाव्याख्या—तर्कदीपिका ॥

6308. TARKABHĀṢĀVYĀKHYĀ—TARKADĪPIKĀ.

Burnell's Catalogue No. 2227 * Page 118. Right column.

Substance—Paper. Size—$10\frac{1}{4} \times 8\frac{3}{8}$ **inches**. Sheets—26. Lines—11 to a Page. Script—Devanāgarī. **No. of Granthas**—286. Author—Keśava. Incomplete. Wants end. Not printed.

Beginning—Same as No. 6307.

End:

तत इति । तदनन्तरमित्यर्थः । ननु सर्वपरा न-
कमित्यप्रेक्षणीयम् (?) । एकपदेनैव चरितार्थत्वादत आह ।
पदार्थप्रसंगेति । पदार्थ इत्यर्थः ।

Subject: Tarkadīpikā up to the beginning of Anumāna.

Remarks:—The Ms. is in a fairly good condition. On the title page is given

तर्कदीपिका बरखेडि बावेन लिखितम् ।

॥ तर्कभाषाव्याख्या—तत्त्वप्रबोधिनी ॥

6309. TARKABHĀṢĀVYĀKHYĀ—TATTVAPRABODHINĪ.

Burnell's Catalogue No. 222. **Page** 111. Right column.

Substance—Paper. Size—12×5 inches Sheets—88. **Lines**—10 to a Page. Script—Devanāgarī. No. of **Granthas**—1121. Author—Gaṇeśadīkṣita. Wants end. Not printed.

Beginning:

हयग्रीवाय नमः । श्रीगणेशाय नमः ।

ॐ केशकेशवरूपैर्यः सृजत्यवति हन्ति च ।
तं गणेशमहं वन्दे स्मृतिमात्राघनाशनम् ॥

गोविन्ददीक्षितं तातमुमां नत्वा च मातरम् ।
क्रियते तर्कभाषायाष्टीका तत्त्वप्रबोधिनी ॥

धर्मार्थकाममोक्षरूपेषु पुरुषार्थेषु मध्ये मोक्षस्यात्यन्ताभ्यर्हितत्वात् "आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्य-" इति श्रुत्या श्रवणानन्तरभाविमननस्य मोक्षं प्रति करणताबोधनान्मननस्य चात्मविशेष्यकेतरभिन्नप्रकारकानुमितिरूपत्वादात्मानं प्रधानतो निरूपयन् तदुपोद्घातत्वेनेतरपदार्थजातनिरूपणं करिष्यमाणः कर्तव्यविघ्नाविघातकं शब्दतदुपजीविप्रमाणेतरप्रमाणबोधितबलवदनिष्टानुबन्धीष्टसाधनताकत्वरहिताविहितेष्टसाधनाविषयकभ्रमरहिताचारत्वेनानुमितश्रुतिबोधितकर्तव्यताकं मङ्गलं बहिरेव विधाय प्रेक्षावत्प्रवृत्त्यंगे विषयप्रयोजने कथयन् चिकीर्षितं प्रतिजानीते बालोऽपीति । एषा तर्कभाषा तर्कस्य भाषा व्याप्यारोपेण व्यापकारोपस्तर्कः । तस्य भाषास्वरूपकथनमित्यर्थः । यद्वा एतदनुग्राह्यप्रमाणविषयप्रमाणादिपदा-

र्थाः लक्षणया तर्कशब्देनोच्यन्ते । तेषां भाषाकथनमि-
त्यन्वर्थतया ग्रन्थनाम कथितम् । कस्य प्रयोजनायेत्यत
आह । तस्य कृत इति । तन्निमित्तमित्यर्थः ।

End :

अत उक्तं तात्पर्येति । यद्यपि तात्पर्यं विषयता तत्र
तथापि अजनितमुख्यतात्पर्यविषयान्वयबोधत्वमित्यर्थो
बोध्य इति न नामधात्वाख्यातक्रियाकारकपदानां घट-
कर्मत्वानयनकृतीनां च स्वरूपेणोपस्थितेरविशेषाद्घट अं
इत्यादि पदाज्जायमानोपस्थितिनान्वय...... ।

Subject: Tarkabhāṣāvyākhyā. Otherwise known as Tattvaprabodhinī up to Śabdakhaṇḍa beginning.

Remarks:—The Ms. is in a fairly good condition. Dr. Burnell wrongly describes this Ms. as a copy of Ujjvalā of Gopīnātha.

Gaṇeśa Dīkṣita is the author of this commentary on the Tarkabhāṣā known as Tattvaprabodhinī. Gaṇeśa Dīkṣita is the son of one Govinda Dīkṣita. Probably he was a South Indian Brāhmaṇa of the 17th century.

॥ तर्कभाषाव्याख्या—तत्त्वप्रबोधिनी ॥

6310. TARKABHĀṢĀ VYĀKHYĀ—TATTVAPRABODHINĪ.

Burnell's Catalogue No. 2219. Page 118, Right column. Substance—Paper. Size—14×6 inches. Sheets—33. Lines—11 to a Page. Script—Devanāgarī. No. of Gran-

thas—1089. Author—Ganeśdīkṣita. Incomplete. Wants end. Not printed.

Beginning—Same as No. 6309.

End:

न नामधात्वाख्यातक्रियाकारकपदानां षटकर्मत्वान-
यनकृतीनाञ्च स्वरूपेणोपस्थितेरविशेषाद्धट अमित्यादिप-
दाज्जायमानोपस्थितिनान्विय.... ।

Colophon: Nil.

Subject: Tarkabhāṣāvyākhyā, known as Tattvaprabodhinī.

Remarks:—The Ms. is in an excellent condition. Alternate sheets are sulphurated.

॥ तर्कभाषाव्याख्या—तत्त्वप्रबोधिनी ॥

6311. TARKABHĀṢĀVYĀKHYĀ TATTVAPRABODHINĪ.

Burnell's Catalogue No. 10907 a. Page 118, Right column. Substance—Palm leaf. Size—18×1½ inches. Leaves—21 (20th missing). Lines—8 to a Page. Script—Grantha. No. of Granthas—504. Author—Ganeśadīkṣita. Incomplete. Wants end. Not printed.

Beginning—Same as No. 6309.

End:

उक्तानुमानं विभजते । तच्चेति । निरूपितमेव लिङ्ग-
परामर्शात्मकमनुमानं द्विविधमित्यर्थः । द्विविधं दर्शयति ।
स्वार्थेति । तत्राद्यं लक्षयति ।

Subject: Tarkabhāṣāvyākhyā, known as Tattvaprabodhinī

Remarks:—The Ms. is in a fairly good condition. The other works contained herein are:

i Some fragmentary sheets of some Kāvya and some Tarka tract.

ii Nyāyasiddhāntatattvam.

The latter work is not noticed by Dr. Burnell.

॥ तर्कभाषाव्याख्या—तत्त्वप्रबोधिनी ॥

6312. TARKABHĀṢĀVYĀKHYĀ TATTVAPRABODHINĪ.

Burnell's Catalogue No. 2210. Page 118. Right column. Substance—Paper. Size—9×4 inches. Sheets—27. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Gaṇeśadīkṣita. Incomplete. Anumāna only. Not printed.

Beginning:

उपजीव्यत्वादादौ प्रत्यक्षं निरूप्य तदुपजीवकत्वात्तदनन्तरमनुमानं निरूपयति । लिङ्गपरामर्शोऽनुमानमिति । नन्वनुमानं न प्रमाणम्, सर्वत्रैवोपाधिसंशयेन व्याप्तिग्रहस्यासंभवात् ।

End:

वह्निरनुष्णः कृतकत्वादिति । प्रत्यक्षेणेति । प्रपञ्चित इति शेषः । केवलान्वयि केवलव्यतिरेक्यन्वय-

व्यतिरेकि चेति त्रिविधमनुमानं निरूपितमित्याह । व्याख्यातमिति ॥

Colophon:

इत्यनुमानपरिच्छेदः समाप्तः

Subject: Tarkabhāṣāvyākhyā, known as Tattvaprabodhinī Anumānapariccheda.

Remarks:—The Ms. is in a fairly good condition.

॥ तत्त्वप्रबोधिनीव्याख्या—न्यायविलासः ॥

6313. TATTVAPRABODHINĪVYĀKHYĀ NYĀYAVILĀSAḤ.

Burnell's Catalogue No. 2220. Page 118. Right column. Substance—Paper. Size—14×6 inches. Sheets—114. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—3750. Author—Viśvanāthabhaṭṭa. Incomplete. Wants end. Not printed

Beginning:

व्याख्यां तत्त्वप्रबोधिन्या विश्वनाथः स्वमातरम् ।
नत्वा न्यायविलासाख्यां वितनोति यथामति ॥

स्वचिकीर्षितग्रन्थपरिसमाप्तिप्रतिबन्धकविघ्ननिकृन्तकं मङ्गलं शिष्यशिक्षायै शिष्टाचारोल्लङ्घनेन स्वस्य मत्तत्वशङ्कया स्वकृतग्रन्थस्य प्रेक्षावदनुपादेयतावारणाय च ग्रन्थतो निबध्नाति । केशकेशवरूपैरिति ॥ अनेन सुरासुरवन्द्यमूर्त्यात्मकत्वाभिधानादवश्यनमस्कार्यत्वं गणेशस्योक्तमिति

ध्येयम् । इतरौ नमस्कुर्वन् चिकीर्षितं प्रतिजानीते ॥
गोविन्ददीक्षितामिति ॥

End:

तस्मादेवायोग्यता वाक्यायोग्यता भ्रमे सति वाक्यार्थ-
बोधदर्शनात् । तत्पूर्वमताज्ञानसमयेऽपि प्रागभावोस्तीति
योग्यताज्ञानविलम्बादेव कार्याभाव इति तस्य हेतुत्वात् ।
न च जनितान्वयबोधादपि वाक्याप्रवृत्त्यकालान्तरेऽन्व-
यबोधदर्श........ ।

Colophon: Nil.

Subject: Tattvaprabodhinīvyākhyā, known as Nyāyvilāsa a commmentary on Gaṇeśadīkṣita's commentary on Tarkabhāṣā.

Remarks:—The Ms. is in excellent condition. Alternate sheets are sulphurated.

This work of Viśvanātha Bhaṭṭa, probably a South Indian Brahmin of the 17th century A. D. is called Nyāyavilāsa and is a commentary on the Tattvaprabodhinī of Gaṇeśa-dīkṣita which in turn is a commentary on Keśavamiśra's Tarka Bhāṣā.

॥ तत्वप्रबोधिनीव्याख्या—न्यायविलासः ॥

6314. TATTVAPRABODHINĪVYĀKHYĀ NYĀYAVILĀSAḤ.

Burnell's Catalegue No. 2221. Page 118 Right column.
Substance—Paper. Size—12×5¼ inches. Sheets—116.

Lines—11 or 12 to a page. Script—Devanāgarī. No. of Granthas—4322. Author—Viśvanāthabhaṭṭa, Incomplete. Not printed.

Beginning: Same as No. 6313.

यदि नियमेन स्वविषयज्ञानसापेक्षत्वमेव... प्रयोजकमिति न वेदस्यानुमापकता तदा प्रकृतेऽपि तुल्यमित्यभिप्रायेण सदृष्टान्तं स्वातन्त्र्येण प्रामाणत्वमुपपसं....आकांक्षादिमद्वाक्यत्वेनेति ।

Colophon: Nil.

Subject: Tattvaprabodhinīvyākhyā, otherwise known as Nyāyavilāsa.

Remarks:—The Ms. is in much decaying condition.

॥ तत्त्वप्रबोधिनीव्याख्या—न्यायविलासः ॥

6315. TATTVAPRABODHINĪVYĀKHYĀ NYĀYAVILĀSAḤ.

Burnell's Catalogue No. 2209. Page 118. Right column. Substance—Paper. Size—9×4 inches. Sheets—80. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1770. Author—Viśvanāthabhaṭṭa. Complete. Not printed.

Beginning:

असाङ्गत्यपरिहारायाह । उपजीव्यत्वादिति । उपजीव्यत्वं तद्व्यतिरेकप्रयोजकव्यतिरेकप्रतियोगित्वम् । प्रत्यक्षव्यतिरेके च व्याप्तिज्ञानाद्यभावेनानुमित्यभावात् ।

तद्व्यतिरेकप्रयोजकव्यतिरेकप्रतियोगित्वं प्रत्यक्षस्यास्तीति
भावः ॥

End:

॥ ज्ञानसमवायीति ॥ अनुमानेन मनस्यसमवा-
यिकारणसंयोगाश्रयत्वज्ञानदशायां विभुद्वयसंयोगानङ्गी-
कारेणात्मनो विभुत्वनिश्चयात्ममनसोऽणुत्वं निश्चितमिति
भावः ॥ आगमेनेति ॥ राजा राजसूयेन यजेतेत्यागमेन
राज्ञ एव कर्तव्यताबोधनादिति भावः ।

Colophon:

इत्यनुमानपरिच्छेदःसमाप्तः

Subject: Tattvaprabodhinīvyākhyā, otherwise known as
Nyāyavilāsa.

Remarks:— The Ms. is in a fairly good condition.

On the title page is given

गणेशदीक्षितीयव्याख्यान

Dr. Burnell's description on p. 118 b involves the repetition of the number 2221. The first of the two descriptions is of the No. 2209—the Ms. here described above. It contains only 80 sheets.

॥ तत्त्वप्रबोधिनीव्याख्या—न्यायविलासः ॥

6316. TATTVAPRABODHINĪVYĀKHYĀ NYĀYAVILĀSAḤ.

Burnell's Catalogue No. 2215. Page 118. Right column.
Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—55.
Lines—10 to a Page. Script—Devanāgarī. No. of Gran-

thas—1485. Author—Viśvanāthabhaṭṭa. Incomplete. Not printed.

Beginning:

...त्रसिद्धत्वाद्दोष इत्याह । अनुमितेति । अनुमित-श्रुतिबोधितकर्तव्यताकमित्यापाततः । हृदादिमानुपूर्व्या-दिविशेषनिश्चयाभावनाबोधकत्वात् । वस्तुतस्तु अनुमाना-देव कर्तव्यः ।

End:

अघटादिरूपप्रतियोगिताज्ञानाभावेऽपि घटत्वप्रतीति-दर्शनात् न च क्लृप्तभावेऽन्तर्भावात् कथं भावत्वमिति वाच्यम् । वत्ववत्त्वासिद्धावतिरिक्तभावत्वकल्पनस्यैवोचित-त्वात् । एतदभिसंधायाह । इत्यास्तामिति ॥ ननु सा-मान्यस्य परमार्थत्वेऽपि विकल्पकस्य प्रत्यक्षत्वमसिद्धमेवे-त्याह । एवमिति ॥

Subject: Tattvaprabodhinīvyākhyā, known as Nyāyavilāsa Anumāna and śabda.

Remarks:—The Ms. is in very good condition. Alternate sheets are sulphurated.

॥ तर्कभाषाव्याख्या—उज्ज्वला ॥

6317. TARKABHĀṢĀVYĀKHYĀ—UJJVALĀ.

Burnell's Catalogue No. 10896 Page 119. Left column. Substance—Palm leaf. Size—14×1½ inches. Leaves—66. Lines—10 to a page. Script—Grantha. No. of Granthas—1960. Author—Gopīnātha. Incomplete. Not printed.

Beginning:

साकूतसस्मितविलोकितजाततृष्णे
कृष्णे करस्पृशि सरोरुहमिन्दिरायाः ।
लीलाञ्चितं नयनयोर्मनसोऽभिलाषो
डोलायितं श्रवणकुण्डलयोः पुनातु ॥

गोपीनाथेन विदुषा नत्वा हरिपदाम्बुजम् ।
संक्षिप्य तर्कभाषायाः भावः कश्चित्प्रकाश्यते ॥

कर्तव्यविघ्नविघातकं परमेश्वरनत्यादिकं मङ्गलं मनस्येवाचरन् तत्र प्रेक्षावतां प्रवृत्तिसिद्ध्यर्थं ... धेयाभिधानद्वारा विषयप्रयोजनं सूचयन् इतरग्रन्थापेक्षया स्वग्रन्थस्य श्रैष्ठ्यं प्रतिपादयति बालोऽपीति । अधिकव्युत्पत्तिरहितोऽपीत्यर्थः ॥

End:

स एवायमित्यत्र तु गकारेणगत्वमभेदश्च भासते । तच्च व्यक्तिभेदविषयतया जात्यवच्छिन्नाभेदविषयतां वा समानमित्यवश्यं वर्णानामनित्यत्वम् । अन्यथा ध्वनीनामपि नित्यता कुतो न स्यात् । प्रत्यभिज्ञादितौल्यादिति केचित्तु प्रत्यभिज्ञा एका उत्पाद......

Colophon: (Leaf No. 56)

इति सोमकुलसमुद्भूतमहाठक्कुरश्रीभवनाथसुत गोपीनाथविरचितायां
तर्कभाषाटीकायामनुमानपरिच्छेदः समाप्तः ॥

(Leaf 57)

उपमानपरिच्छेदः समाप्तः ॥

Subject: Tarkabhāṣāvyākhyā, otherwise known as Gopīnāthīya.

Remarks:—The Ms. is in a fairly good condition.

Gopīnātha Thakkur, the author of this commentary on Keśavamiśra's Tarkabhāṣā called Bhāvaprakāśa is the same as the author of Maṇisāra. He flourished about the end of the 16th century A. D. This commentary is also known by the name Ujjvalā.

This libaary has 14 more Mss. of this work and they are tabulated below.

TARKABHĀṢĀVYĀKHYĀ (UJJVALĀ) OF GOPĪNĀTHA.

Descriptive No.	Collection No.	Substance	Size inches.	No. of Sheets or leaves	No. of Lines per Page or sheet.	Script	Complete or otherwise.
6318	B. L. 1089a.	Palm leaf	$15\frac{1}{2}\times1\frac{1}{2}$	61	8	Nāndināgarī	Incomplete: up to the middle of Prāmāṇya grantha
6319	Ms. not Noticed by Dr. Burnell 14486	Paper	$9\frac{1}{2}\times4$	13	11	Devanāgarī	„ Pratyakṣa; ends abruptly.
6320	B. L. 2225	„	$10\frac{1}{4}\times4\frac{1}{4}$	44	10	„	„ „ „
6321	„ 10893	Palm leaf	$18\times1\frac{1}{2}$	45 (98-142)	8-10	Grantha	„ wants end.
6222	Ms. not noticed by Dr. Burnell 14488	Paper	$10\frac{3}{4}\times8\frac{3}{4}$	21	11	Devanāgarī	„ „ „
6323	B. L. 10892	Palm leaf	$16\frac{1}{2}\times1\frac{1}{2}$	80	7	Grantha	„ „ „
6324	„ 10897	„	$15\times1\frac{1}{4}$	71	6	„	„ „ „

TARKABHĀṢĀVYĀKHYĀ (UJJVALĀ) OF GOPĪNĀTHA.

Descriptive No.	Collection No.	Substance	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
6825	B. L 10895	Palm leaf	$18\frac{1}{4} \times 1\frac{1}{2}$	4[illegible]	10	Grantha	Incomplete, from the beginning up to the end of Upamāna
6826	,, 10894	,,	$14 \times 1\frac{1}{4}$	10	8	,,	,, Fragmentary ends abruptly.
6827	,, 10958	,,	$17\frac{3}{4} \times 1\frac{1}{2}$	57	8	,,	,, Incomplete. Pratyakṣa.
6828	Ms. Not noticed by Dr. Burnell 14482	Paper	$10 \times 3\frac{3}{4}$	19	8	Devanāgarī	,, Śabdakhaṇḍa.
6829	,, 14488	,,	$9\frac{1}{2} \times 3\frac{3}{4}$	8	8	,,	,, Fragments of Śabdakhaṇḍa

6880	,,	14469	,,	$10\frac{1}{2} \times 4\frac{1}{2}$	30	12 or 13	,,	,, Upakramopasamhāraprābalyavicāra.
6881	,,	14474	,,	$10\frac{1}{4} \times 8\frac{3}{4}$	23 (22–55)	9	,,	,, Fragmentary, wants beginning and end.

DETAILED REMARKS
on the
UJJVALĀ MSS.
IN THE ABOVE TABLE.

6318 Dr. Burnell notices only Gopīnātha's work in this bundle. Really this contains the following 3 works—

10891 a. (Sheets 61) Bhāvaprakāśika of Gopīnātha.

" b. (Sheets 80) " Vyākhyā called a commentary on the above work by an unknown author, and

" c. (Sheets 47) Bhāvārthadīpikā,—Gourīkānta's commentary on the Tarkabhāṣā.

6325 There is a loose leaf at the end containing some stotra.

6330 Gopīnātha begins this work of his thus—

उपक्रमस्य प्रबलत्वमूचिरे
यथोपसंहार...नो बुधाः ।
प्रतिष्ठितां तामिह तर्कसन्ततिं
प्रबोधयामः प्रतिकूलजल्पितात् ॥

॥ उज्ज्वलाव्याख्या ॥

6332. UJJVALĀVYĀKHYĀ.

Burnell's Catalogue No. 10891 b. Page Left column. Substance—Palm leaf. Size —$15\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—80. Lines—8 to a Page. Script—Nandināgarī. No. of Granthas —900. Author—? Incomplete. Not printed.

Beginning:

.. शिवं रामं वरदं च गजाननम् ।

स्कन्दं गुरुञ्च कलये गणनाथञ्च शङ्करम् ॥

मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि भवन्तीति न्यायमनुस्मृत्य कर्तव्यवृन्दस्य निष्प्रत्यूहमवाप्तये...देवतास्मरणं शिष्यशिक्षायै ग्रन्थतो निबध्नाति— साकूतेति ॥

End:

उक्तेति । प्रतिज्ञामात्रेण....कृते तदेकधर्मितावच्छेदक ...अत आहेति । तथा चेति । किरण व्युत्पन्न....धर्मितानवच्छेदकत्वादिति भावः । नन्वनुमाने......

Colophon: (Leaf 36)

प्रत्यक्षपरिच्छेदस्समाप्तः

Subject: An anonymous commentary on Gopīnātha's commentary on the Tarkabhāṣā.

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see remarks under No. 6318.

This commentary on the commentary of Gopīnātha on the Tarkabhāṣā, is wrongly classified and described by Dr. Burnell as Gopināthā's commentary itself. There is no evidence to find out the author of this work. Ujjvalā seems to be another name for Gopīnātha's Tarkabhāṣāvyākhyā known also as Bhāvaprakāśikā .

॥ उज्ज्वलाव्याख्या ॥

6333. UJJVALĀVYĀKHYĀ.

Burnell's Catalogue No. 2222. Page 118. Right column.

Substance—Paper. Size—10¼ × 5 inches. Sheets—45. Lines—14 or 15 to a Page. Script—Devanāgarī. No of Granthas—1430 Author—? Incomplete. Pratyakṣa only Not printed.

Beginning:

मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानीति न्यायमनुसृत्य कर्तव्यस्य ग्रन्थस्य निष्प्रत्यूहसमाप्तये स्वाभिमतविशिष्टदेवतास्मरणं स्वशिष्यशिक्षार्थं ग्रन्थतो निबध्नाति। साकूतेति ॥ तर्कभाषां व्याचिख्यासुः स्वव्याख्याने प्रेक्षावदुपादेयतासिद्धये प्रयोजनवत्तर्कभाषया स्वग्रन्थं सङ्घटयन् तदीयभावपरिज्ञानं प्रातिस्विकफलञ्च सूचयन् व्याख्यान्तरापेक्षया स्वग्रन्थस्य वैलक्षण्यं सूचयन् बहुविघ्नशंकया हरिनमस्काररूपं मङ्गलान्तरञ्च निबध्नन् स्वस्य व्याख्यासामर्थ्यञ्च प्रकटयन् स्वस्य प्रसिद्ध्यर्थं स्वनाम च कीर्तयन् चिकीर्षितञ्च प्रतिजानीते ॥ गोपीनाथेनेति ॥

End:

अतद्व्यावृत्तावपीति। न च तद्व्यावृत्तेस्तुच्छत्वात् तेनैवोक्तत्वात् तत्रोक्तविकल्पग्रासेऽपि न दोष इत्याशङ्क्याह। अलमतिविस्तरेणेति। तथा च घटस्याप्युक्तविकल्पनिरासः स्यात्। न च वाच्यमवगतस्यास्यैतावता न निरास इति। घटादेरप्यनेककपालानुगतत्वादिति भावः॥

Colophon:

इति प्रत्यक्षपरिच्छेदः समाप्तः।

Subject: A commentary on the Tarkabhāṣāvyākhyā of Gopīnātha; Pratyakṣa

Remarks:—The Ms. is in a fairly good condition.

This and the following Mss. are wrongly described by Dr. Burnell as Gopīnātha's commentary on Tarkabhāṣā.

॥ उज्ज्वलाव्याख्या ॥

6334. UJJUVALĀVYĀKHYĀ.

Burnell's Catalogue No. 2339 Page 118. Right column.

Substance—Paper. Size—14 × 5¾ inches. Sheets—61. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—1433. Author—? Complete. Pratyakṣa only. Not printed.

Beginning, end, colophon and subject—Same as No. 6332.

Remarks:—The Ms. is in a fairly good condition. Alternate sheets are sulphurated.

॥ तर्कभाषाप्रकाशः ॥

6335. TARKABHĀṢĀPRAKĀŚAḤ.

Burnell's Catalogue No. 10898. Page 119. Left column.

Substance—Palm leaf. Size—14½ × 1¼ inches. Leaves—67. Lines—5 to a Page. Script—Telugu. No. of Granthas—860 Author—Govardhana. Complete. Printed.

Beginning:

श्रीहयग्रीवाय नमः ।

यस्तर्कभाषामनुभाषते स्म गोवर्धनस्तर्ककथासु धीरः ।
तेनानवद्येन सुधांशुगौरी कीर्तिर्गुरूणाममृताधिकास्तु ॥

विजयश्रीतनूजात्मा गोवर्धन इति श्रुतः ।
तर्कानुभाषां तनुते विविच्य गुरुनिर्मिताम् ॥

श्रीविश्वनाथानुजपद्मनाभा-
नुजो गरीयान् बलभद्रजन्मा ।
तनोति तर्कानधिकृत्य सर्वान्
श्रीपद्मनाभाद्विदुषो विनोदम् ॥

शिष्यप्रवृत्तयेऽभिधेयं प्रतिजानीते । बालोऽपीति ।

End:

नन्वत्र व्युत्पादितेषु पदार्थेषु केचित्सम्यङ् न व्युत्पादिताः केचित्तु न व्युत्पादिता एवेति किमनेन ग्रन्थेनेत्यत आह इहेति । बालव्युत्पत्तेस्तावतैव सिद्धेरित्याशयः ।

Colophon:

दिशतु पुरन्दरसोदरमिन्दिरसुन्दरं शं वः ।
अभिलषितमिन्दिरया विधुन्तुदारुन्तुदं तेजः ॥

इति श्रीबलभद्रात्मजविजयश्रीगर्भसंभवविश्वनाथपद्मनाभानुजमिश्रगोवर्धनविरचितस्तर्कभाषाप्रकाशः समाप्तः । इदं गोवर्धनमिश्रीयम् । रामाभट्टेन लिखितम् । श्रीसरस्वत्यै नमः । श्रीशारदाम्बायै नमः ।

Subject: Tarkabhāṣāprakāśa.

Remarks:—The Ms. is in a fairly good condition.

All that we know of this author Govardhana is from what he himself says in the introductary verses and from the colophon. He was the son of Balabhadra and Vijayaśrī and he had two brothers named Viśvanātha and Padmanābhā. Per-

haps he is the same as the author of the popular Nyāyabodhinī—the commentary on Annambhaṭṭa's Tarka manual.

The Tarkabhāṣā with this commentary of Govardhana has been edited with introduction and notes by S. M. Paranjpe and published from Poona, 1909.

॥ तर्कभाषाप्रकाशः ॥

6336. TARKABHĀṢĀPRAKĀŚAḤ.

Burnell's Catalogue No. 10899. Page 119. Left column. Substance—Palm leaf. Size—12×1 inches. Leaves—43. Lines —7 to a Page. Script—Grantha. No. of Granthas—860 Author—Govardhana. Complete. Not Printed.

Beginning, end, colophon and subject—Same as No. 6335.

Remarks:—The Ms. is in a fairly good condition.

॥ तर्कभाषाप्रकाशः ॥

6337. TARKABHĀṢĀPRAKĀŚAḤ.

J. L. Collection No. 901,
Substance—Paper. Size—8½×4½ inches. Sheets—27. Lines—10 to a Page. Script—Devanagarī. No. of Granthas— Author—Govardhana. Incomplete. Anumāna alone complete. Not printed.

Beginning:

उपजीव्यं प्रत्यक्षं निरूप्य तदुपजीवकं अनुमानं
निरूपयितुमुपक्रमते – लिङ्गपरामर्शोऽनुमानमिति ॥

ॐ तत्सदेभिः प्रतिपादिताय नित्याखिलेच्छाकृतिधीयुताय ।
लीलाघनश्यामकलेवराय नमोऽस्तु तस्मै जगदीश्वराय ॥

उज्ज्वला तर्कभाषाया इयं भावार्थदीपिका ।
भट्टाचार्येण धीरेण गौरीकान्तेन तन्यते ॥

मातर्भारति हे शिरोमणिवचोव्याख्यानसत्कौशलैः
स्वाहङ्कारतयैव केशवकृतिव्याख्यासु किं लज्जसे ।
कर्पूरप्रचुरोल्लसत्खदिरयुक्ताम्बूलजो वाधरे
रागो यावकजोऽथवा यदि तदा का नाम शोभाक्षतिः ॥

इह खलु प्रेक्षावन्तो ग्रन्थाभिधेयप्रयोजनसम्बन्धान्प्रतीत्यैव तदध्ययनादौ प्रवर्तन्ते । तदुक्तं ॥

सिद्धार्थं सिद्धसंबन्धं श्रोतुं श्रोता प्रवर्तते ।
शास्त्रादौ तेन वक्तव्यः संबन्धः सप्रयोजन इति ॥

अतः प्रारीप्सितस्वग्रन्थे प्रेक्षावत्प्रवृत्तये प्रयोजनाभिधेयसंबन्धान् दर्शयन् शिष्यावधानाय तर्कभाषाप्रकाशनं प्रतिजानीते ॥ बालोऽपीति ॥

End :

अत्यन्तानुपयुक्तानामिति । बालकस्य शास्त्रप्रवेशेऽनपेक्षितानामित्यर्थः । तेषां वादजल्पयोरेवापेक्षितत्वात् । विद्यार्थिनस्तु गुरुणा सतीर्थ्यैर्वा सह वादकथायामेवाधिकारात् बालव्युत्पत्त्यर्थमेवास्य ग्रन्थस्य कृतत्वादिति भावः । एतदेव दर्शयति । एतावतैवेत्यादिनैवेति ॥ शुभमस्तु ॥

श्रीकाशीविश्वनाथाय नमः ।

भजन्तु कतिचित्क्रिया यजनमानहोमादिका
व्रजन्तु कतिचिद्वयं स्वपरतारिकां तत्क्षणम् ।
परे कुशलबुद्धयः परिमृशन्तु तत्त्वं परं
गुरुप्रवरपादुके परमहन्तु सेवे सदा ॥

श्रीबालकृष्णानन्दसरस्वत्यै नमः ॥

गुरुचरणारविन्दाभ्यां नमः ।

हे धीरास्तर्कभाषाया न कर्तव्यावधीरणा ।
शास्त्रवत्सर्व एवास्यां सूत्रवद्दिश्यते यतः ॥

नावगेया तर्कभाषा बालकैर्दृश्यते यदि ।
वानरोल्लङ्घितोऽप्येष नागाधः किं महोदधिः ॥

अन्येषामपि संविलोक्य विवृतीः सम्यक् विभाष्याकरं
मात्सर्यं मनसोविहाय कलयन् व्याख्यांमदीयामपि ।
भावार्थं प्रतिसन्दधाति हृदये कोऽपीह धीरो यदि
स्यादेवात्र तदा विनिर्मितविधौ श्लाघ्यो ममायं श्रमः ॥

पिपठिषतां बालानां शिष्याणामिह काम्यया ।
श्रीगौरीकान्तेन धीरेण कृता भावार्थदीपिका ॥

Colophon:

इति श्रीमहोपाध्यायश्रीगौरीकान्तसार्वभौमभट्टाचार्यविरचिता भावार्थ-
दीपिका नाम तर्कभाषाटिप्पणी संपूर्णा ॥

Subject. Tarkabhāṣāvyākhyā, otherwise known as Bhāvārthaṭippaṇī.

Remarks:—The Ms. is in good condition. The other work contained herein is Viṣṇustotra.

Gaurikānta was a native of North Bengal. He seems to have flourished about the end of the 16th century and the beginning of the 17th century. He gives his teacher's name as Bālakṛṣṇa Sarasvati, seems to have commented on Raghunātha also.

His commentary on the Tarkabhāṣā is known as Bhāvārtha dīpikā

Below are described in a table 17 more Mss. of this work, available in this library.

BHĀVĀRTHADĪPIKA OF GOURĪKĀNTA.

Descriptive No.	Collection No.	Substance	Size inches.	No. of Sheets or leaves	No. of Lines per Page or sheet.	Script	Complete or otherwise.
6339	B. L. 10902 (a & b)	Palm leaf.	$18\times1\frac{1}{2}$	140 (83+57)	8 or 9	Grantha.	Complete.
6340	„ 10903	„	$17\times1\frac{1}{2}$	80	6	Telugu	Incomplete, Pramāṇa Pariccheda only.
6341	„ 10904	„	$15\times1\frac{1}{2}$	64	10	Grantha.	„ „ „
6342	„ 10891c	„	$17\times1\frac{1}{2}$	47	8	Nandināgarī.	„ „ „
6343	„ 10905	„	$16\frac{3}{4}\times1\frac{1}{2}$	94	9	Grantha.	„ Wants end.
6344	„ 2228**	Paper	$9\times5\frac{3}{4}$	42	10	Devanāgarī.	„ Pratykṣa Pariccheda only.
6345	„ 10901	Palm leaf.	$15\frac{1}{4}\times1\frac{1}{2}$	255	6	Telugu.	Complete wants a few lines at first.
6346	B. L. 10906	„	$17\times1\frac{1}{8}$	40	10	Grantha.	Incomplete: wants beginning & end.

6347	,,	2228*	Paper	$7\frac{1}{4}\times4\frac{1}{2}$	83	10 or 11	Devanāgarī.	,, Anumāna only.
6348	Ms. Not noticed by Burnell.	15555	,,	$10\times3\frac{3}{4}$	23	9	,,	,, ,,
6349	,,	15556	,,	$10\frac{1}{4}\times3\frac{3}{4}$	26	9-12	,,	,, wants end.
6350	,,	14465	,,	$9\frac{3}{4}\times3\frac{3}{4}$	27	13	,,	,, wants beginning and end.
6351	,,	14466	,,	$9\times3\frac{1}{2}$	11	10	,,	,, Upamāna ,
6352	B. L.	2228***	,,	$10\times3\frac{1}{2}$	41	8	,,	,, Sabda Paric-cheda only
6353	Ms. Not noticed by Burnell.	14±71	,,	$8\frac{3}{4}\times4$	20	12	,,	,, wants beginning and end.
6354	,,	14472	,,	$9\frac{1}{2}\times4$	14	14	,,	,, Prameya Section.
6355	S. K.	30	,,	12×4	8	13	,,	,, Fragment only.

DETAILED REMARKS

on the

GOURĪKĀNTĪYA MSS. TABULATED ABOVE.

6339 Colophon:

செங்காலிபுரம் ராயன் புத்காரன ராமன் எழுத்து.

6341 The colophon gives—

ഇതി സൂത്ര ദിവാകര ശാസ്ത്രി [illegible]

[illegible] ‖

6342 The other works contained with this, in the same bundle are—

a. Gopīnātha's commentary on Tarkabhāṣā 6295.

b. A commentary on the above noted work of Gopīnātha.

‖ तर्कभाषाप्रकाशिका ‖

6356. TARKABHĀṢĀPRAKĀŚIKĀ.

Burnell's Catalogue No. 2212. Page 118. Right column. Substance—Paper. Size—10×4 inches Sheets—135. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—2780. Author—Cennubhaṭṭa. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ।

सकृन्नत्वापि ये लोको लभते शान्तिसम्पदम् ।
स नः पायादपायेभ्यो योगानन्दनृकेसरी ॥ १ ॥

भवसञ्चितपापौघविध्वंसनविचक्षणम् ।
विघ्नान्धकारभास्वन्तं विघ्नराजमहं भजे ॥ २ ॥

चिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय शिष्टाचारपरिप्राप्तं विशिष्टेष्टदेवताप्रणामरूपमंगलं मनसि निधाय तत्र प्रेक्षावत्प्रवृत्त्यर्थं विषयप्रयोजने निर्दिशन् चिकीर्षितं प्रतिजानीते ॥ बालोऽपीति ॥ एषा मया प्रकाश्यत इति क्रियाकारकयोजना ॥

End:

अतस्तेषामनिरूपणमनुचितमित्याशङ्कयाह— इहेति । रूपभेदे ज्ञानं ग्रन्थान्तरपरिशीलनेन भविष्यति । इह त्वनुपयुक्तं रूपभेदे निरूपणम् । बालव्युत्पादनार्थं प्रवृत्तत्वात् बालव्युत्पादनं न सामान्यनिरूपणेनैव जातमिति रूपभेदनिरूपणस्यानौचितिर्नास्तीति सर्वमवदातम् ।

Colophon:

इति श्रीहरिहरमहाराजपरिपालितेन सहजसर्वज्ञविष्णुदेवाराध्यतनूजेन सर्वज्ञानुजेन चेन्नुभट्टेन विरचितायां तर्कपरिभाषाप्रकाशिकायां प्रमेयादिपरिच्छेदः समाप्तः ॥ श्रीसाम्बशिवार्पणमस्तु ।

Subject: Tarkabhāṣāprkāśikā.

Remarks:—The Ms. is in good condition.

Cennubhaṭṭa, the author of this commentary on Tarkabhāṣā seems to be an Āndhra brahmin, probably of the 16th century A. D. He was the protege of a King called Harihara.

10 more Mss. representing this same work, which we have in our library are here tabulated below.

TARKABHĀṢĀPRAKĀŚIKĀ.

Descriptive No.	Collection No.	Substance	Size inches.	No of Sheets or leaves	No. of Lines per Page or sheet.	Script.	Complete or otherwise
6357	B. L. 2211	Paper.	$9\frac{1}{2}\times4\frac{1}{4}$	140	8	Devanāgarī.	Complete.
6358	,, 2416	,,	$11\frac{3}{4}\times5$	88	11	,,	,,
6359	,, 2227	,,	14×6	92	11 or 12	,,	,,
6360	,, 10908	Palm leaf.	$14\frac{1}{2}\times1$	130	4	Grantha.	,,
6361	,, 10909	,,	$16\times1\frac{1}{2}$	90	7 or 8	,,	Incomplete; wants end.
6362	,, 10914	,,	14×1	22	4 or 5	,,	,, ,,
6363	Ms. Not noticed by Burnell. 14463	Paper.	$10\frac{1}{4}\times4\frac{1}{2}$	18	10	Devanāgarī.	,, ,,
6364	,, 14467	,,	$10\frac{1}{4}\times3\frac{3}{4}$	55	11	,,	,, wants beginning;
6365	B. L. 10912	Palm leaf.	$15\times1\frac{1}{2}$	42	8	Grantha.	,, ,,
6366	,, 10910a	,,	$15\times1\frac{1}{2}$	84	6	Telugu.	Wants beginning and end.
6367	,, 10911	,,	$15\frac{1}{4}\times1\frac{1}{2}$	128	7	Grantha.	,, ,,

DETAILED REMARKS

on the

CENNUBHAṬṬĪYA MSS. NOTICED

IN THE ABOVE TABLE.

6360 On the last leaf is given—

एष ग्रन्थः अरुणाद्रिपित्रा लिखितं ।

एतदरुणाद्रिना सम्पादितमिद पुस्तकं ॥

6361 The other work herein written together is Naiṣadha.

6364 The Ms. was written by Keśava.

6365 Colophon:

இந்த சென்னபட்டீயம் ராமலிங்கன் எழுதது. அப்பைய

தீட்சிதருடைய சென்னபட்டீயம.

On the last leaf is given the following:

श्रीमन्नप्पययज्वसिंह सुतरामाजानासिद्धं जना

आचारं भवतोऽपदेशरहितं दृष्ट्वा जगत्पावनं ।

पुण्य...अरुन्धतीपतिमृषिं नैव स्तुवन्त्यादरात्

विश्वामित्रमुनेस्स्मरन्ति न च तां गाथामगस्त्यस्य च ॥

Evidently this Ms. belonged to the great Appayya Dīkṣita.

The other verse given here is a praise on King Muñja.

राजन्मुञ्जकुलप्रताप सकलक्ष्मापालचूडामणे

युक्तं सञ्चरणं तवाद्भुतमणेश्छत्रेण रात्रावपि ।

मा भूत् त्वद्वदनावलोकनवशात् व्रीलावनम्रश्शशी

मा भूच्चेयमरुन्धती भगवती दुश्शीलताभाजनम् ॥

6366 There are some loose sheets at the end which begin with the well-known Anuṣṭub defining a 'Sūtra' and con-

tain a collection of the Kārikas of Kusumañjali besides many other unidentifiable verses.

॥ निरुक्तिवृत्तिः ॥

6368. NIRUKTIVṚTTIḤ.

Burnell's Catalogue No. 10912a. Page 118. Right column. Substance—Palm leaf. Size—14 × 1¼ inches. Leaves—8. Lines—5 or 6 to a Page. Script—Telugu. No. of Granthas—96. Author—Viṣṇubhaṭṭa. Complete. Not printed.

Beginning:

भुवि सञ्चितपापौघविध्वंसनविचक्षणम् ।
विघ्नान्धकारभास्वन्तं विघ्नराजमहं भजे ॥

सकृन्नत्वापि यं लोको लभते शान्तिसम्पदः ।
स नः पायादपायेभ्यः योगानन्दनृकेसरी ॥

पारंगतं सकलदर्शनसागराणा-
मासोपदेशचरितार्थितसर्वलोकम् ।
श्रीशार्ङ्गपाणितनयं निखिलागमज्ञं
सर्वज्ञविष्णुगुरुमन्वहमाश्रयेऽहम् ॥

गुरुजालवेदिभट्टार्यशिष्यो विष्णुः सनातनः ।
ल
विवरिष्ये निरुक्तांस्तु चेन्नुभट्टीयसंज्ञितान् ॥

End:

अभावो नाम समवायत्वे सत्यसमवायः । असमवाय

इत्युक्ते द्रव्यत्वादिपञ्चकेति व्याप्तिरत उक्तम् । असम-

वायादि....विरतावत्युक्ते समवाये अतिव्याप्तेरत उक्तम् ।

समवाय इति ।

Colophon:

निरुक्तिवृत्तिर्बालबोधवैकासकारिणी ।

श्रि.. स भावगाहिना सादरं गृह्यतामियम् ।

इति श्रीविष्णुभट्टविरचिते चेन्नुभट्टलविरचितनिरुक्तिवृत्तिः समाप्ता ॥

श्रीसरस्वत्यै नमः श्रीगणाधिपतये नमः ॥

Subject: Niruktivṛtti.

Remarks:—The Ms. is in a fairly good condition. The other work contained herein is some Tarka tract,

This is a commentary on the Tarkabhāṣāvyākhyā of Cennubhaṭṭa by one Viṣṇubhaṭṭa and not that of Cennubhaṭṭa itself as Dr. Burnell wrongly describes it.

Viṣṇubhaṭṭa, a pupil of Peddidhaṭṭa is the author of this commentary on the Cennubhaṭṭīya. This author lived probably in the 16th century A. D.

॥ तर्कभाषाव्याख्या ॥

6369. TARKABHĀṢĀVYĀKHYĀ.

Burnell's Catalogue No. 2228. Page 118. Right column. Substance—Paper. Size—$10\frac{1}{2} \times 3\frac{3}{4}$ inches. Sheets—10. Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—243. Author—Rāmabhadratīrtha. Incomplete. Not printed.

Beginning:

श्रीमदानन्दतीर्थाचार्यगुरुभ्यो नमः ॥

'संनिहितपरित्यागे मानाभावात्' इति न्यायेन प्रकाश्यत इति क्रियायाः युक्त्यन्विततर्कभाषेत्यनेन संबन्धे एषेति पदं व्यर्थं स्यादिति । अतः 'स्थितस्य गतिश्चिन्तना' इति न्यायेन पदवैयर्थ्यं क्रियाकारकयोजनां करोति ।एषा-मथेति । ननु तर्कशब्दस्य सूत्रस्थिततर्कवाचकत्वे प्रमा-णादिपदार्थप्रतिपादनमसङ्गतमत आह । तर्कशास्त्रमिति ।

End:

तस्माद्देहेन्द्रियादिव्यतिरिक्तो जीवः । सुखदुःखादि-वैचित्र्यात्प्रतिशरीरं भिन्नः । स च न परमाणुः । सुखदुः-खानुपलब्धिप्रसंगात् । न मध्यमपरिमाणः । तस्यानित्यत्वे कृतहानाकृताभ्यागमप्रसंगात् ।

Subject: Tarkabhāṣāvyākhyā; Rāmabhadratīrthīya.

Remarks:—The Ms. is in a fairly good condition. Dr. Burnell groups this wrongly under Tarkabhāṣāprakāśikā.

This commentary on Tarkabhāṣā is by one Rāmabhadratīrtha and seems to be called Prakāśa. The author is evidently a Mādhva as can be seen from the first sentence.

This Ms. Dr. Burnell wrongly describes as Cennubhaṭṭīya.

॥ तर्कभाषाव्याख्या ॥

6370. TARKABHĀṢĀVYĀKHYĀ.

Burnell's Catalogue No. 2224* Page 119. Left column.

Substance—Paper. Size —$6\frac{1}{2} \times 4\frac{1}{4}$ inches. Sheets—91. Lines—11 to a Page. Script—Devanāgarı. No. of Granthas —1125. Author—Murārıbhaṭṭa. Complete. Not printed.

Beginning:

वेदव्यासाय नमः ॥

पद्मनाभपदाम्भोजरजसामनुसेवनात् ।
तर्करीतिमनु ज्ञात्वा ध्यात्वा तत्पादपङ्कजम् ॥

गङ्गाधरपितुर्नत्वा चरणौ मुरवैरिणः ।
व्याख्यानं तर्कभाषायाः क्रियते शिवतुष्टये ॥

प्रारीप्सितप्रतिबन्धकविघ्नविघातक इष्टदेवतानत्यादिरूपं मङ्गलं मनसि निधाय प्रेक्षावत्प्रवृत्त्यर्थं इतरग्रन्थाधिकातिशयं दर्शयन्नेव विषयाद्यनुबन्धचतुष्टयं दर्शयति । बालोऽपीति ॥ अत्रापिशब्दो विरोधाभासालङ्काराय । तद्धानन्तु बालस्योत्पन्नमात्रस्य न्यायशास्त्रे प्रवेशेच्छा न सम्भवति । सा हि इष्टसाधनताज्ञानसाध्या । तच्चानुभवरूपमनुभावकाभावात् नापि स्मृतिरूपमनुभवात् । न च स्तनपानप्रवृत्तौ यथा स्मरणं तथेहापीति वाच्यम् । तत्र जीवनानुपपत्तिलक्षणप्रमाणेन तत्कल्पनात् । प्रत्यक्षचेष्टादिना तदनुमानाच्च । न हि अत्र प्रमाणं किञ्चिदपि संभवतीति द्रष्टव्यम् ।

End:

न हि ब्राह्मणो व.. ताइशानामपि तेषां दर्शनात् । असदुत्तरं सव्याघातकम् । ननु यदि विस्तरभिया जात्यादीनां सविशेषमनिरूपणं तादात्म्यादीनां वारद्वय

निरूपणे कथनं न विस्तरः न हि संभवति हि केषां...
निरूपणे न विस्तरः । केषाञ्चित्...निरूपणे विस्तर
इत्यत आह । इहेति ।

Colophon:

श्रीमद्गङ्गाधरात्मज मुरारिमिश्रविरचिततर्कभाषाव्याख्यानं समाप्तम् ।

Subject: Tarkabhāṣāṭīkā otherwise known as Murāribhaṭṭīya.

Remarks:—The Ms. is in a fairly good condition.

The author of this commentary on Tarkabhāṣā is Murāribhaṭṭa, son of Gaṅgādhara and pupil of Padmanābha.

॥ तर्कभाषाव्याख्या ॥

6371. TARKABHĀṢĀVYĀKHYĀ.

Burnell's Catalogue No. 2224. Page 119. Right **column.**

Substance—Paper. Size—$11\frac{3}{4} \times 5\frac{1}{4}$ **inches.** Sheets—33. Lines—10 to a Page. Script—Devanāgarī. No. of **Granthas**—800. Author—Murāribhaṭṭa, Incomplete. Not printed.

Beginning—Same as No. 6370.

End:

ननु तदपि दुर्लभम् । नारायणपदादौ प्रथमवर्णज्ञान-
काले चरमवर्णाभावे तज्ज्ञानाभावात् पवर्णाज्ञानकाले च
प्रथमवर्णविनाशेन ज्ञानसम्भवादत आह । एवञ्चेति ।
अनुभूयेति । एतेनानुभावाभावात् कथं तत्संस्कारसा-
हित्यं श्रोत्रस्येति शङ्का परास्ता । अन्त्यवर्णे.... ।

Subject: Tarkabhāṣāvyākhyā, otherwise known as Murāribhaṭṭīya up to the middle of Upamāna.

Remarks:—The Ms. is in a fairly good condition.

॥ तर्कभाषाव्याख्या ॥

6372. TARKABHĀṢĀVYĀKHYĀ.

Burnell's Catalogue No. 10931 b. Page 121. Right column. Substance—Palm leaf. Size—$14\frac{1}{2} \times 1\frac{1}{2}$ inches. Sheets—44 (30-73). Lines—7 to a Page. Script—Grantha. No. of Granthas—756 Author— ? Incomplete. Not printed.

Beginning:

.. इतरेषामतिविस्तृतत्वादेतस्मादेव तत्कार्यसिद्धि-रित्यर्थः । यद्वा तर्कशास्त्रे प्रविविक्षोः पुरातननिबन्धा एव व्याख्यायन्ताम् । किमपूर्वनिर्माणेनेत्यत आह ॥ 'अलस इति' ॥ वाञ्छमाप्यालस्य युक्तःअतो न तत्राधिकारीत्यर्थः * * * ननु कथमत्राधिकारीत्यथाह— 'अल्पेन श्रुतेनेति ।'

End:

हेतुनिष्ठत्वोक्तिरसाधकतानुमानसौकर्यार्थे । अत्र साध्याभावज्ञानमात्रस्य बाधत्वे अधिकबलत्वात् ज्ञाने तृतीयलिङ्गपरामर्शो विशेषदर्शनत्वेन साध्याभावज्ञानं परिभूय साध्यं साधयेत् ॥ पर्वते धूम इव वह्निं प्रमात्वेन जाता.... ।

Subject: Tarkabhāṣāvyākhyā Wants a little in the beginning; runs up to a part of Anumānakhaṇḍa.

Remarks:—The Ms. is in a fairly good condition.

From the pratīkas, we come to know this work to be a commentary on Keśava's Tarkabhāṣā' by some unknown author.

॥ तर्कसंग्रहः ॥

6373. TARKASAṄGRAHAḤ.

Burnell's Catalogue No. 2121. Page 121. Right column. Substance—Paper. Size—11 × 6 inches. Sheets—6 (1-6). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—Annambhaṭṭa. Complete. Printed.

Beginning:

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।
बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः ॥

End:

काणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये ।
अन्नंभट्टेन विदुषा रचितस्तर्कसङ्ग्रहः ॥

Colophon:

इत्यन्नम्भट्टमहोपाध्यायविरचितस्तर्कसंग्रहः समाप्तः

Remarks:—The Ms. is in an excellent condition. Alternate sheets are sulphurated.

Annambhaṭṭa is the author of this famous manual of Nyāya, the Tarkasaṅgraha. The author has himself commented upon this work and the commentary is called Dīpikā The author was an Āndhra—a native of the North Arcot District, belonging to some obscure viilage near Chittoor. He lived about 1625 A. D. He has commented on many

works: as for e. g. on the Aṣṭādhyāyī of Pāṇini called Mitākṣara, on Kaiyaṭa's Vṛtti, on the Mahā Bhāṣya of Patañjali, and on the Brahma Sūtras. The work has been printed by the Śri Bālamanorama Press, Madras.

28 Mss. more of Tarkasaṅgraha are described below in a tabular form.

TARKASAṄGRAHA.

Descriptive No.	Collection No.	Substance	Size inches.	No. of Sheets or leaves	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
6374	B. L. 2122	Paper.	14×6	6	11	Devanāgarī.	Complete.
6375	Ms. No. 14451 Not noticed by Burnell	,,	10×4½	10	9	,,	,,
6376	,, 14456	,,	8½×4	12	8	,,	,,
6377	,, 14457	,,	10×2½	8	9	,,	,,
6378	,, 14458	,,	10×4	6	13	,,	,,
6379	,, 14463	,,	11×4½	5	10	,,	,,
6380	B. L. 10827	Palm leaf.	18¼×1¼	5	6	Grantha.	,,
6381	,, 10828a	,,	17×1½	4	10	,,	,,
6382	J. L. 902	Paper.	9½×4½	9	9	Devanāgarī.	,,
6383	,, 903	,,	9½×4¼	11	7	,,	,,
6384	,, 904	,,	9½×4¼	8	12	,,	,,
6385	S. S. 52	,,	10½×4½	9	9	,,	,,

6386	S. K. 15	Paper.	10×4½	8	10	Devanāgarī.	„
6387	B. L. 10830a	Palm leaf.	17¾×1½	5	9	Grantha.	„
6388	N. S. 45	Paper.	9½×4¼	9	9	Devanāgarī.	„
6389	K. M. 15	„	8×4	8	10	Telugu.	Incomplete; wants end.
6390	Ms. No 14460 Not noticed by Burnell	„	10½×4	4	8	Devanāgarī.	„ „
6391	„ 14455	„	10½×4	8	6	„	„ „
6292	„ 14454	„	9×3½	9	7	„	„ „
6393	„ 14453	„	10×4	11	7	„	„ „
6394	„ 14450	„	9½×4	7	7	„	„ „
6395	J. L. 905	„	8¼×3¼	7 (2–8)	10	„	Incomplete: wants beginning: From Ātmagrantha to the end.
6396	„ 906	„	10½×4	5 (3–7)	8	„	„ From Saṅkhyā to the end.

TARKASAṄGRAHA. (Contd.)

Descriptive No.	Collection No.	Substance	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
6397	J. L. 907	Paper.	$7\frac{1}{2} \times 3\frac{3}{4}$	9 (4-12)	7	Devanāgarī.	„ Do. Do.
6398	„ 908	„	$8 \times 4\frac{1}{4}$	5 (6-10)	11	„	„ From Kāraṇa tothe end.
6399	B. L. 14459	„	$9\frac{1}{4} \times 4\frac{1}{4}$	9 (2-10)	8	„	Incomplete. From Apgrantha to the end.
6400	S. S. 34b	Palm leaf.	$10\frac{1}{2} \times 1\frac{1}{2}$	3	7	Grantha.	„ From Kāla up to the beginning of Śabdakhaṇḍa.
6401	J. L. 909	Paper.	9×4	4 (4-7)	9	Devanāgarī.	From dravalakṣaṇa to Hetvābhāsa.

DETAILED REMARKS

on the

TARKASAṄGRAHA MSS. NOTICED

IN THE ABOVE TABLE.

6377 On the title page is given—

तर्कसंग्रहस्य पुस्तकं हदाजि पण्डितस्य पुत्रस्य चौण्डाजि पण्डितस्य । तेनैव लिखितं ॥

6385

हे पुस्तकमन्यं भट्टाचे घरचें ।

तैलाद्रक्षेत् + इदं वदति पुस्तकम् ॥

6384

तुक्कदेवपौत्रतुक्कदेवेन लिखितः ॥

6387 The other work contained herein is Tarkasaṅgraha-dīpikā.

6396 Colophon:

पार्थायनसमाह्वेन तर्कसङ्ग्रहपुस्तकम् ।

अलेखि परपाठाय काश्यामेतद्विपश्चिता ॥

ब्रह्मानन्दस्वामिपुस्तकमिदं ॥

6397 Colophon:

इदं पुस्तकं वृकोपनाम्नो गङ्गाधरदीक्षितस्येति ज्ञेयं ॥

6398 Colophon:

इदं पुस्तकं नागेश्वरेण लिखितं । स्वार्थं परार्थं च ।

6400 The other work contained herein is Vaiyāsikanyāyamālā.

॥ तर्कसङ्ग्रहः ॥

6402—6455. TARKASAṄGRAHAḤ.

Not noticed by Dr. Burnell Mss. Nos. 14313-14336.

Substance—Paper. Size—12×5 inches. Sheets—8. Lines—9 to a Page. Script—Devanāgarī. Author—Annambhaṭṭa. Complete. Printed.

These 54 copies of Annambhaṭṭa's Tarkasaṅgraha, the details of which are given above, are printed copies. They were printed here in the King's Press, in A. D. 1811. The frontispiece of each copy has the picture of Śiva and Vināyaka.

The final verse found at the end of all these copies is as follows:—

मिते लालसार्यैः (1733 Śaka) प्रजापत्यभिख्ये-

ऽब्दके शालिवाहे शके वार्णयन्त्रे ।

अयं सङ्ग्रहश्शुद्धतर्कस्य कल्पः

स्वयं तुळ्वाळि वंश्य सरस्वण्णनाम्ना ॥

॥ तर्कसंग्रहव्याख्या—दीपिका ॥

6456. TARKASAṄGRAHAVYĀKHYĀ—DĪPIKĀ.

Burnell's Catalogue No. 2119. Page 122. Left column.

Substance—Paper. Size—13¾×6 inches. Sheets—17. Lines—10 to a Page. Script—Devanāgarī. No. of

Granthas—450. Author—Annambaṭṭa. Complete. Printed.

Beginning:

विश्वेश्वरं साम्बमूर्तिं प्रणिपत्य गिरां गुरुम् ।
टीकां शिशुहितां कुर्वे तर्कसङ्ग्रहदीपिकाम् ॥

End:

तस्मात्पदार्थ ज्ञानान्मोक्षः परमप्रयोजनमिति सर्वं रम-
णीयम् ॥

Colophon:

तर्कसङ्ग्रहदीपिका समाप्ता अन्नंभट्टविरचिता ॥

Subject: Tarkasaṅgrahadīpikā.

Remarks:—The Ms. is in excellent condition. Alternate sheets are sulphurated.

15 Mss. more of Dīpikā are tabulated below.

TARKASAṄGRAHAVYĀKHYĀ—DĪPIKĀ.

Descriptive No.	Collection No.	Substance	Size inches	No. of Sheets or leaves	No. of Lines per Page or sheet.	Script	Complete or otherwise.
6457	B. L. 2120	Paper	14×6	15	10	Devanāgarī	Complete.
6458	„ 10828b	Palm leaf	$17 \times 1\frac{1}{2}$	12 (5-16)	10	Grantha	„
6459	„ 10830b	„	$17\frac{3}{4} \times 1\frac{1}{2}$	13 (5-17)	9	„	„
6460	J. L. 910	Paper.	9×4	16	11	Devanāgarī.	„
6461	„ 911	„	$10\frac{1}{2} \times 4$	21	9	„	„
6462	„ 912	„	$9\frac{1}{4} \times 4\frac{1}{2}$	23 (3-25)	10	„	Incomplete: From lakṣaṇa to the end.
6463	N. S. 46	„	$12 \times 4\frac{1}{2}$	6	11	„	„ From Śabda-prāmāṇya to the end.
6464	J. L. 913	„	10×4	10	5 or 6	„	„ From beginning to the establish-

							ment of Gold as Taijasa.
6465	Ms. No. 14452 Not noticed by Burnell	,,	10×4	8	9	,,	,, From beginning up to Paramāṇuprakriyā.
6466	J. L. 914	,,	10¼×4	18	6	,,	,, Wants a little in the beginning: ends with bhūtapratyakṣa.
6467	B. L. 14462	,,	9½×4	15	7	,,	,, Wants beginning and end.
6468	S. K. 38	,,	11×4	10 (17-26)	14	,,	From Īśvarasādhana up to Patanakarma.
6469	B. L 10828	Palm leaf.	17×1½	5	10	Grantha.	,, Fragments of Saṅgraha and Dīpikā.
6470	Ms. No. 14464 Not noticed by Burnell	Paper.	9½×4	2	7	Devanāgarī.	Fragments of Dīpikā.

TARKASAṄGRAHAVYĀKHYĀ—DĪPIKĀ. (Contd.)

Descriptive No.	Collection No.		Substance	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
6471	K. M.	16	Paper.	8×4	1	10	Telugu.	Incomplete; From beginning up to part of Śiṣṭācāra in maṅgalavāda.

DETAILED REMARKS

on the

DĪPIKĀ MSS.

IN THE ABOVE TABLE.

6457 Colophon:

विद्वत्प्रभुवरश्रीमद्विनायकतनूभुव: ।

प्रभोर्यसन्तरायस्य ग्रन्थ एष प्रवर्धताम् ॥

6458 The other work contained herein is Tarkasaṅgraha.

6463 The title page gives—

"इदं पुस्तकं लक्ष्मिनारायणेन लिखितं । इदं पुस्तकं कान्तिनाथस्य ॥"

6468 We see on the title page—

'शेषभट्टात्मजबालाख्यस्य'

॥ तर्कसङ्ग्रहव्याख्या—दीपिका ॥

6472—6499. TARKASAṄGRAHAVYĀKHYĀ—DĪPIKĀ.

Not noticed by Burnell Mss. Nos. 14367-14392,

Substance—Paper. Size—12×5 inches. Sheets—22. Lines—9 to a Page. Script—Devanāgarī. Author—Annambhaṭṭa Complete. Printed.

These 28 copies of Annambhaṭṭa's Dīpikā, like those of his Tarkasaṅgraha are the first editions of the work. They were printed in a private press at the palace here, in Tanjore. A verse at the end, similar to the one, given under re-

marks under the printed copies of Tarkasangraha gives the same date (i.e.) A. D. 1811 to these copies.

No. 14370 alone contains two copies of the text.

॥ तर्कसङ्ग्रहदीपिकाव्याख्या—प्रकाशिका ॥

6500. TARKASANGRAHADĪPIKĀVYĀKHYĀ—PRAKĀŚIKĀ.

S. S. Collection No. 45 a. Substance—Paper. Size—15½ × 1⅛ inches. Sheets—64. Lines—7 or 8 to a Page. Script—Grantha. No. of Granthas—2000. Author—Rāyanṛsimha. Complete. Printed.

Beginning:

ध्यात्वा श्रीमातृपादाब्जे दीपिकायाः प्रकाशिका ।
श्रीरायनरसिंहेन पण्डितेन चिकीर्ष्यते ॥

इदानीं प्रमाणत्वघटकत्वादुपस्थितं प्रमात्वं स्वतो ग्राह्यमिति केचन परतो ग्राह्यमित्यपरे वदन्ति ।

End:

इत्थं च वेदान्तशास्त्रश्रवणोपयोगि न्यायशास्त्रं मननोपयोगि न्यायशास्त्रं निदिध्यासनोपयोगि चेति परंपरया त्रयाणामविशेषेण मोक्षफलकत्वं निराबाधमिति न किञ्चिदनुपपन्नमिति दीपिकाकारस्य निगूढाभिप्रायः ॥

Colophon:

इति महोपाध्याय श्रीबालकृष्णतर्कालङ्कारभट्टाचार्यसद्गुरुप्रसादाल्लब्धविद्यावैभवः श्रीमदारूरुवंशपरंपरापारावारराकासु-

धाकररायनरसिंहकृतदीपिकाप्रकाश. संपूर्णः ॥

श्रीगुरुभ्यो नमः ॥ श्रीमीनाक्षीसुन्दराय नमः ॥

श्रीबालाम्बिकासमेतवैद्यनाथाय नमः ॥

पार्थिववर्षघटककुम्भमासीयाष्टाविंशतिदिने शुक्लपक्षे कृत्तिकानक्षत्रयुक्त-
गुरुवासरे षष्ठ्यां वैद्येश्वरक्षेत्राख्यग्रामवासिना गणपतिशर्मणः पुत्रेण
सुब्रह्मण्यशर्मणा लिखितमिदं । सुब्बराय इति व्यवहारनाम ।

Subject: Nṛsimhaprakāśikā or Tarkasaṅgrahadīpikāvyākhyā.

Remarks:—The Ms. is in a fairly good condition. On the title page is given

नृसिंहप्रकाशिका ग्रन्थघटकप्रामाण्यवादसंपुटः सुब्बरायन् स्वाधीनं
ग्रन्थं । तेन लिखितम् । अन्येन लिखितं सुब्रह्मण्यशर्मणा ।

The other work contained herein is Āpastamba Śrāddhaprayoga.

The author of this commentary on Annambhaṭṭa's Tarkasaṅgraha is the same as the author of the Prabhā—a commentary on the Muktāvali. Rāyanarasimha flourished in Kāncī in the 19th century A. D. and his teacher was Bālakṛṣṇa Tarkālaṅkāra. He belongs to the line called Ārūruvamśa. The work has been published by the Śrī Bālamanoramā press, Madras.

॥ तर्कसङ्ग्रहदीपिकाव्याख्या—प्रकाशिका ॥

6501. TARKASAṄGRAHADĪPIKĀVYĀKHYĀ—PRAKĀŚIKĀ.

S. S. Collection No. 158. Substance—Palm leaf. Size—

$6\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—43. Lines—9 to a Page. Script—Grantha. No. of Granthas—2000. Author—Rāyanarasimha. Incomplete. Printed.

Beginning:

ध्यात्वा श्रीमातृपादाब्जे दीपिकायाः प्रकाशिका ।
श्रीरायनरसिंह्मेन पण्डितेन चिकीर्ष्यते ॥
तत्र प्रारीप्सितग्रन्थविरामविरोधिविघ्नव्यूहविध्वंसनविचारणां विश्वनाथादिनुतिं शिष्यशिक्षार्थमादौ निबध्य शिष्यावधानाय प्रारीप्सितं प्रतिजानीते विश्वेश्वरमित्यादिना ॥

End:

मूले शब्दगुणकमिति ॥ अत्र शब्दत्वं लक्षणं लक्षणतावच्छेदकं शब्दत्वजाति । * मुक्तावलीप्रभायामनुसन्धेयम् ॥

Colophon:

आकाशनिरूपणात्पूर्वं लिखितम् । साधारणनामके वर्षे मार्गशीर्षे मासे कृष्णपक्षे अमावास्यायां सूर्यास्तमनसमये गुरुवासरे लिखितं सुब्रह्मण्यशास्त्रिणा ॥

Subject: Tarkasaṅgrahadīpikā—Prakāśikā otherwise known as Nṛsimhaprakāśikā.

From the beginning to Ākāśanirūpaṇam.

Remarks:—The Ms. is in a fairly good condition. The other work contained herein is Āpastambaśrautaprayoga.

॥ तर्कसङ्ग्रहदीपिकाव्याख्या--प्रकाशिका ॥

6502. TARKASAṄGRAHADĪPIKĀVYĀKHYĀ—PRAKĀŚIKĀ.

S. S. Collection No. 176& 177. Substance—Palm leaf. Size—17 × 1¼ inches. Leaves—51+37=88. Lines—6 to a Page. Script—Grantha. No. of Granthas—1200. Author—Rāyanarasimha. Incomplete. Wants end. Printed.

Beginning:

वन्दे रामानुजगुरुं वन्दारुघनकल्पकम् ।
अनन्तसरसीदिव्यतीरानित्यकुटुम्बिनम् ॥
ध्यात्वा श्रीमातृ० Same as No. 6501

End:

यथार्थानुभव एवेत्यर्थः । प्रमेत्युच्यत इति । प्रमाश-ब्देन व्यवाहियत इत्यर्थः * * तथा सति घट इत्याकारकतद्धर्मितावच्छेदकप्रमायामतिव्या-प्त्यापत्तेः । तादृशप्रमीयविशेष्यतायाः......

Subject: Tarkasaṅgrahadīpikāprakāśikā otherwise known as Nṛsimhaprakāśa from the beginning to Prāmāṇya-lakṣaṇa.

Remarks:—The Ms. is in good condition.

॥ तर्कसङ्ग्रहदीपिकाव्याख्या—प्रकाशिका ॥

6503. TARKASAṄGRAHADĪPIKĀVYĀKHYĀ-PRAKĀŚIKĀ.

S. K. Collection No. 32. Substance—Paper. Size—10 × 4¾

inches. Sheets—(42-96). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1250. Author—Rāyanara simha. Incomplete. Printed.

Beginning:

....रत्नयोरिति । अनयोर्हि कालपिण्डसंयोगः समवायिकारणमिति वक्ष्यते । अतस्तदाश्रयतया कालस्य सिद्धिरिति भावः । एक इति भेदे मानाभावादिति भावः ॥

End:

अप्रयोजकत्वमाशङ्क्य निराकरोति । न हीति । अत्र हेतुमाह । गुणादीनामिति । संक्षेप इति । अयं भावः । चतुर्विंशतिगुणा इत्यादिप्रतीतिबलेन गुणादौ तावत्सङ्ख्या प्रतीयते । स च साक्षात्सम्बन्धेनैव । तत्र ता......

Subject: Tarkasaṅgrahadīpikāprakāśikā from Kālalakṣaṇa to Ātmalakṣaṇa.

Remarks:—The Ms. is in good condition. On the title page is given

'प्रसादः बालसूरेरिदम्'

॥ तर्कसङ्ग्रहटिप्पणी—तत्त्वार्थदीपिका ॥

6504. TARKASAṄGRAHAṬIPPAṆĪ—TATTVĀRTHADĪPIKĀ.

Burnell's Catalogue No. 2124. Page 122. Left column. Substance—Paper. Size—14×6 inches Sheets—100. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—4600. Author—Veṅkaṭaguru. Complete. Not printed.

Beginning:

कस्तूरीकमनीयास्यः करुणाकलशोदधिः ।
कमलामनो रंगी करोतु करुणां मयि ॥ १ ॥

फलं यः सप्तर्षिप्रमुखतपसां प्रादुरभव-
न्नृसिंहः संहृष्यन् नृतति(?)घटिकाद्रौ वसति यः ।
महार्यार्घैरार्यैर्महितचरणो यश्चिरमसा
वपायात्पायान्माममृतफलवल्लीसहचरः ॥ २ ॥

वाधूलान्वयवार्धिकौस्तुभमणिर्वन्दारुचिन्तामणिः
वादिव्रातमश्छटादिनमणिर्वागीशचूडामणिः ।
श्रीमत्सौम्यवरार्यवर्यतनयः श्रीमन्महार्यात्मजः
श्रीमान्सद्गुणशेवधिर्विजयतां श्रीश्रीनिवासो गुरुः ॥ ३ ॥

श्रीवाधूलकुलोत्तंसः श्रीनिवासार्यनन्दनः ।
तनुते वेङ्कटाचार्यस्तर्कसंग्रहटिप्पणीम् ॥ ४ ॥

सन्तु साहसिकाः कामं साम्यसूयास्सहस्रशः ।
सन्त्येव सुधियस्तेन सफलोऽस्मत्समुद्यमः ॥ ५ ॥

अन्नंभट्टो नाम कश्चन विपश्चित् दुश्चरतपश्चरणाद्विगुणितबुद्धिवैशद्यैः दूरीभवदवद्यैः कणचरणपक्ष्यचरणप्रधानैः प्राचीनैर्बहुधा लक्षणप्रमाणाभ्यां लक्षितमपि पदार्थसार्थं व्युत्पित्स्वनुजिघृक्षया परिमितपदनिबन्धेन तर्कसङ्ग्रहनामकेन केनचित्प्रबन्धेन संगृह्य स्वयमेव श्रुतार्थधारणनैपुणीविधुराणां मितमतीनां हिताय तमेव प्रबन्धं व्याचिकीर्षुः प्रारीप्सितपरिसमाप्तिपरिबन्धिप्रत्यूहसमूह-

व्यपोहनाय विवक्षितार्थविशदावबोधनसमर्थगंभीरभारती-गुम्भनचातुरीस्थिरीकरणाय च विरचितं परमेश्वरसरस्वती-गुरुप्रणतिरूपं मंगलं स्वप्रारीप्सितफलञ्च स्वस्वग्रन्थयोर-शिष्टत्वग्रन्थत्वशंकानिराकरणाय संकीर्तयंश्चिकीर्षितं प्रति-जानीते ॥ विश्वेश्वरमित्यादिना ॥

टीकां कुर्वे इत्यन्वयः ॥

End:

तथापि तदविरोधेन तस्याप्युपपादकं स्मृत्यन्तरमस्तीति तत्प्रतिपन्नार्थस्याप्यस्वारस्यमन्तरेणैवोपपादनाय तदुप-पादकतत्तद्वचनोपादनमिति मन्तव्यम् । ज्ञानद्वारैवेत्येवका-रव्यावर्त्यं दर्शयति । नन्विति । उक्तमर्थमुपसंहरति । तस्मादिति ॥

अस्त्वत्र बहु वक्तव्यमधिकोक्तिश्च वर्तताम् ।
अथाप्यस्ति विशेषोऽपीत्यनुगृह्णन्त्वमत्सराः ॥

व्युत्पित्सूनां हितायेयं वेङ्कटार्येण निर्मिता ।
तनोतु सुधियां प्रीतिं तर्कसंग्रहटिप्पणी ॥

Colophon:

इति श्रीवाधूलकुलतिलकश्रीशैलदेशिकतनयस्य श्रीवेङ्कटगुरोः कृतिषु तत्त्वार्थदीपिकानाम तर्कसंग्रहटिप्पणी समाप्ता ॥

Subject: Tarkasaṅgrahaṭippaṇi otherwise known as Tattvārthadīpikā.

Remarks :—The Ms. is in a fairly good condition.

Veṅkaṭaguru, the author of this commentary on Annam-

bhaṭṭa, is the son and pupil of Śrīnivāsa. He belongs to the family called Vādhūla.

॥ तर्कसङ्ग्रहदीपिकाटीका ॥

6505. TARKASAṄGRAHADĪPIKĀṬĪKĀ.

Not noticed by Burnell Ms. No. 14461.

Substance—Paper. Size—$9\frac{1}{2} \times 3\frac{1}{2}$ inches. Sheets—8. Lines—10 — 12 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—?. Incomplete. Not printed.

Beginning:

नौमि श्रीशं सिंहमुखं प्रह्लादाभीष्टदं वरम् ।
स मे ददातु सज्ज्ञानं प्रसादं च गुरोर्वरम् ॥

गुरुराजपदं स्तौमि शुकवच्छिक्षितो नरः ।
तर्कसङ्ग्रहटीकां वै व्याख्यास्ये तत्कृपावलात् ॥

बालबोधकतर्कसङ्ग्रहं व्याचिख्यासुरन्नंभट्टः स्वचिकीर्षितकर्मसमाप्तिफलकमिष्टदेवतानमनं विधाय वाचालत्वापादिकां सकलवागभिमानिनीं सरस्वतीं तत्त्वोपदेशकं गुरुवचनमनुशिष्यावधानफलिकां चिकीर्षितप्रतिज्ञां विधत्ते विश्वेश्वरमिति । अहं तर्कसङ्ग्रहदीपिकां टीकां कुर्वे इति योजना । तर्क्यन्ते प्रतिपाद्यन्ते कणादशास्त्र इति कर्मव्युत्पत्त्या तर्कशब्देन सप्तपदार्थाः गृह्यन्ते । ते सङ्गृह्यन्ते संक्षिप्ततया प्रतिपाद्यन्ते अस्मिन्निति...व्युत्पत्त्या तर्कसङ्ग्रहसंज्ञो ग्रन्थविशेषः तस्य दीपिकां प्रकाशजनिकामशेषतदर्थज्ञापिकामिति यावत् । कुर्वे करोमि ।

End:

अन्यमर्थं दर्शयति । कृत्वेत्यर्थ इति मूले तर्क इत्यनेन सप्तपदार्थविषया इति....वितम् । बालानामित्यनेन अधिकार......

Subject: Tarkasaṅgrahadīpikāṭīkā.

Remarks:—The Ms. is in a fairly good condition.

The author of this ṭīkā on the Dīpikā is not known.

॥ तर्कसङ्ग्रहव्याख्या—निरुक्तिः ॥

6506. TARKASAṄGRAHAVYĀKHYĀ—NIRUKTIḤ.

S. S. Collection No. 173.

Substance—Palm leaf. Size —15½ × 1¼ inches. Leaves—43. Lines—6 to a Page. Script—Telugu. No. of Granthas—750. Author—Paṭṭābhirāma. Complete. Printed.

Beginning:

प्रणम्य दक्षिणामूर्तिमक्षीणगुणलक्षणम् ।
तर्कसङ्ग्रहवाक्यार्थनिरुक्तिः क्रियते मया ॥

* *

इह खलु प्रारीप्सितप्रकरणसमाप्तिप्रत्यर्थिप्रत्यूहव्यूहविध्वंसनाय ग्रन्थारम्भे मङ्गलमनुतिष्ठन्ति शिष्टाः ।

End:

इति सर्वं समञ्जसम् ॥

अयुक्तमपि शास्त्रज्ञो यदुक्तं पुनरुक्तिमत् ।
Remarks:—The Ms. is in a fairly good condition. After the colophon is given

इदं पुस्तकं डाङ्कपाति नारायणेन लिखितम् ।

॥ प्रामाण्यवादः ॥

6625. PRĀMĀṆYAVĀDAḤ.

S. S. Collection No. 26.
Substance—Palm leaf. Size—$18\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—34 (11-44). Lines—8-11 to a page. Script—Grantha,

No. of Granthas—1750. Author—Harirāma. Incomplete. Not printed.

Beginning:

....आवश्यकत्वात् अविरोधिज्ञानत्वादयश्च प्रमायामारोपासम्भवात् प्रमात्वाभावावच्छेदकगृहीतशङ्कत्वादिग्रहदशायां श्वैत्यादिलौकिकग्रहवत्सम्भवात् ।

End:

अनेनापि विशेषणेन विश्वविषयकस्य योगिज्ञानस्यैव भगवज्ज्ञानस्यैव वारणात् तत्र सामानाधिकरण्यान्तविशेषणमेतत्कल्पेऽनुपादेयम् । एवञ्च प्रकारतापर्यन्तस्य प्राह्य .... ।

Subject: Prāmāṇyavāda.

Remarks:—The Ms. is in a fairly good condition.

॥ मङ्गलवादः ॥

6626. MAṄGALAVĀDAḤ.

Burnell's Catalogue No. 2330. Page 120. Right column. Substance—Paper. Size—12 × 6¼ inches. Sheets—5. Lines—11 to a Page Script—Devanāgarī. No. of Granthas—182. Author—Harirāmatarkavāgīśa. Complete. Not printed.

Beginning:

ननु मङ्गलं समाप्तिसाधनम् । मङ्गले सत्यपि कादम्बर्यादिग्रन्थासमाप्तेः । मङ्गलं विनापि प्र(स)मनुष्ठितसमाप्तेरन्वयतो व्यतिरेकतश्चाप्यभिचारात् । नापि विघ्नध्वंसं मङ्गलं विनापि तस्य विनायकस्तवपाठादिना जातत्वेन

व्यभिचारात् । तस्मान्मङ्गलं निष्फलमेवेति चेत् । अत्रा-
हुः । मङ्गलं सफलम् । अविगीतशिष्टाचारविषयत्वादित्य-
नुमानेन मङ्गलस्य सफलत्वसिद्धिः

End:

तदर्थं मङ्गलं प्रधानम् । एवं द्विप्रवानविप्रज्ञानवान्
वात्राधिकापीत्तु(?)संशयोद्भवेपि वा तदाचरणात् । यत्तु
आकारे नैमित्तिकादिकमस्य विचारितं तत्वनुपयुक्तत्वादु-
पेक्षितमस्माभिः ।

Colophon:

इति श्रीहरिरामतर्कवागीशरचितो मङ्गलवादः समाप्तः ॥

Subject: Maṅgalavāda.

Remarks:—The Ms. is in a fairly good condition. This Ms. is full of blunders.

॥ लिङ्गोपेहितलैङ्गिकभानविचारः ॥

6627. LIṄGOPAHITALAIṄGIKABHĀNA-VICĀRAḤ.

Burnell's Catalogue No. 2268 Page 120. Right column. Substance—Paper. Size—12½×6 inches. Sheets—34. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—825. Author—Harirāmatarkavāgīśa. Complete. Not printed.

Beginning:

श्रीविनायकाय नमः ॥

वन्हिव्याप्यधूमवान्पर्वत इत्यादिपरामर्शात् वन्हिव्या-

ऽयधूमवान्पर्वतो वन्हिमानित्यनुमितिमामनन्त्याचार्याः । तेषामयमाशयः । तथाविधपरामर्शात् तादृशानुमित्यनङ्गीकारे वन्हिव्याप्यालोकवान् पर्वत इत्यादिपरामर्शादपि * * धूमपरामर्शवत्वानिवेशनमावश्यकं चिन्तामणिकारमते ।

End:

घटपदादिप्रत्यक्षं प्रति तथाविधसामग्र्याः प्रतिबन्धकत्वाकल्पने लाघवसंभवादित्यलमतिशयविस्तरेणेति

Colophon:

इति लिङ्गोपहितलैङ्गिकभानविचारः समाप्तः ॥

स्वस्ति श्रीनृपशालिवाहनशके १७२५ रक्ताक्षिनामसंवत्सरे दक्षिणायने वर्षर्तौ श्रावणमासे शुक्लपक्षे चतुर्दश्यामिन्दुवासरे श्रवणनक्षत्रे शोभननामयोगे वणिक्करणे दिवा तृतीयघटिकासमये तदा सिंहलग्ने इदं पुस्तकं संपूर्णम्

Subject: Lingopahitalaiṅgikabhānavicāra

Remarks:—The Ms is in a fairly good condition On the title page is given:—

हे पुस्तक + लिहिलें अस्सें

The date of this Ms is Śaka 1725 or A. D. 1803.

॥ लिङ्गोपहितलैङ्गिकभानविचारः ॥

6628. LIṄGOPAHITALAIṄGIKABHĀNA-VICĀRAḤ.

Burnell's Catalogue No. 2269. Page 120. Right column.

Substance—Paper. Size—11×5½ inches. Sheets—24 Lines—14-16 to a Page. Script—Devanāgarī. No. of Granthas—825. Author—Harirāmatarkavāgīśa. Complete. Not printed.

Beginning, end and subject—Same as No. 6627.

Colophon:

इति श्रीहरिरामतर्कवागीशकृतलिङ्गोपहितलैङ्गिकभानविचारः समाप्तः।

डम्बलरामेण लिखितोऽस्य ग्रन्थः चित्रभानुसंवत्सरभाद्रपदकृष्ण-पक्षचतुर्दशी भानुवारे समाप्तिमगमत् ।

Remarks:—The Ms. is in a fairly good condition.

॥ विषयतावादः ॥

6629. VIṢAYATĀVĀDAḤ.

N. S. Collection No. 40.

Substance—Paper. Size—12×4 inches. Sheets—12 (4-15). Lines—7 to a page. Script—Devanāgarī. No. of Granthas—210. Author—Harirāmabhaṭṭācārya. Incomplete. Not printed.

Beginning:

...स्य भूतलत्वावच्छिन्नत्वविशिष्टविशेष्यतात्वेन... तन्निरूप्यत्वं। किन्तु भूतलत्वावच्छिन्नविशेष्यतात्वेन भूतलं भूतलमित्यादौ च भूतलत्वावच्छिन्नत्वाविशिष्टविशेष्यतात्वेनैव भूतलत्वप्रकारतानिरूपितत्वमित्यभ्युपगमेन तद्वैलक्षण्योपपत्तेः। अवच्छेदकत्वमपि द्विविधम्। अवच्छिन्नं निरवच्छिन्नम् ॥

End:

एतेनानुमित्यादि साधारणविलक्षणविषयतायाः प्रत्यक्षादिसाधारण्येन स्थलीयप्रतिबन्धकतायां प्रतिबध्यतावच्छेदककोटौ प्रत्यक्षान्यत्वं आपत्त्यन्यत्वं वा निवेश्यमिति गौरवमित्यपि परास्तमिति कृतं पल्लवितेन

Colophon:

इति न्यायालङ्कारतर्कवागीशविरचितो विषयताविवेकः समाप्तिमगमत् ।

Subject: Viṣayatāvāda.

Remarks:—The Ms. is in a fairly good condition.

॥ पक्षतावादः ॥

6631. PAKṢATĀVĀDAḤ.

Burnell's Catalogue No. 2247. Page 120. Left column Substance—Paper. Size—8¼×2¾ inches. Sheets—48. Lines—6 to a page. Script—Devanāgarī. No. of Granthas—680. Author—Rudrabhaṭṭa. Incomplete. Not printed.

Beginning:

श्रीमहेशाचार्यगुरुचरणेभ्यो नमः ।

सत्यपि परामर्शादौ पक्षे साध्यनिर्णयदशायां विनानुमित्यानुमितेरनुदयात् अनुमितिं प्रति पक्षताया हेतुत्वं कल्प्यते । पक्षता च सिसाधयिषाविरहविशिष्टासिद्ध्यभावः ।

End:

प्रत्यक्षात्मसिद्ध्यनन्तरं अनुमितिवारणाय साध्य-
वत्तानिर्णयत्वेन सिद्धेः प्रतिबन्धकत्वकल्पनञ्च लाघवात्।
एवं सामग्रीप्रतिबन्धकत्वे यत्र भाविवन्हिमत्ताज्ञानमयमे-
त्यत्र................. ...

Subject: Pakṣatāvāda.

Remarks:—The Ms. is in a fairly good condition.

॥ आत्मनेपदशक्तिविचारः ॥

6632. ĀTMANEPADAŚAKTIVICĀRAḤ.

Burnell's Catalogue No. 2250. Page 120. Right column.
Substance—Paper. Size—9¼ × 4 inches. Sheets—14.
Lines—8 to a Page. Script—Devanāgarī. No. of
Granthas— Author—Rudrabhaṭṭa. Incomplete.
Not printed.

Beginning:

आख्यातसामान्यस्य कर्तृत्व इव तद्विशेषस्यात्मने-
पदस्य कर्मत्वे शक्तिः न तु यथाश्रुतग्राहि वैयाकरणमत
इव कर्मरूपधर्मवाचकत्वगौरवात्। प्रथमान्तपदार्थे कर्म-
त्वान्वयबलादेव कर्मताविशिष्टधर्मलाभसंभवात् न चात्मने-
पदस्य शानच्प्रत्ययस्य धर्मिणि शक्ते पच्यमानमानये-
त्यादौ पच्यमानादिष्वानयनकर्मत्वान्वययोग्यताद्यनुरो-
धेनावश्यकत्वात्।

End:

अभावान्वयश्चात्मनि कालानवच्छिन्नाश्रयतासम्बन्धेन

गम्यतामिति चेन्न तदुत्तरकाले चैत्रीयो वान्नपाकादिकम-
प्रसिद्धम् ।

Subject: Ātmanepadaśaktivicāra.

Remarks:—The Ms. is in a fairly good condition.

॥ प्रमाणतत्त्वम् ॥

6633. PRAMĀṆATATTVAM.

Burnell's Catalogue No. 2242, Page 120. Left column. Substance—Paper. Size—9×1 inches. Sheets—12 Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—198. Author—Rāmacandrabhaṭṭācārya. Complete. Not printed.

Beginning:

श्रीगणाधिपतये नमः ।

अत्र प्रमाणत्वं विविच्यते तत्र प्रमाणं चतुर्विधम्, प्रत्यक्षानुमानोपमानशब्दभेदात् । अन्यथा विरुद्धप्रत्यक्षत्वानुमितित्वावच्छिन्नस्याविशेषापत्तेरिति । स्मृतिभिन्नज्ञानं प्रत्यक्षाभिन्नं वेत्याद्या विप्रतिप्रतिपत्तयः विधेः सामानाधिकरण्येन निषेधस्य चावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात् । न वा सिद्धसाधनादि ।

End:

किमपराद्धं तर्हि । तत्तद्धर्मिकतत्तत्प्रकारकमानसेच्छाकालो सामान्यतो मानसेच्छाकल्पने च अनुकूलतर्कस्योभयत्राविशेषादिति तथा चैतद्बालकप्रतारणमात्रम् । नैतत्प्रामाण्यानुमित्यादौ मानसत्वकल्पनमित्याहुः अनुमितेर्मानसत्वविचारोऽयम् ।

Subject: Anumititattvavāda.

Remarks:—The Ms. is in a fairly good condition. On the last sheet is given:—

इदं पुस्तकं सुमापतिपण्डितानाम् ।

The author of this work is probably identical with the author of the Siddhānta Sāra, described under No.

The work is a treatise on Poetics, on the number, nature and definition of Pramāṇas.

॥ मङ्गलवादः ॥

6634. MAṄGALAVĀDAḤ.

Burnell's Catalogue No. 2340. Page 115. Right column. Substance—Paper. Size—10×4½ inches. Sheets—12. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—230. Author—Vaidyanāthadīkṣita. Incomplete. Not printed.

Beginning—Same as No.

End:

यद्वा सर्वस्यापि पदार्थस्यासङ्गतदङ्गसमुदायस्य ग्राह्ककरणेह मध्ये न पूर्वमन्वय इत्याद्याः परिहाराः । उपकारविशिष्टस्य करणान्वय इत्याचार्यमतेन द्वितीयः । आचारमूलत्वादिवाक्यत्रयव्यवहितहेतूपपादकशङ्कासुभयार्थ - त्वशङ्का वा तन्निधानप्राप्तां.... ॥

Subject: Maṅgalavāda.

Remarks:—The Ms. is in a fairly good condition.

This tract represents only a portion of his commentary on Rucidatta's Prakāśa.

॥ वादार्थभावः ॥

6635. VĀDĀRTHABHĀVAḤ.

S. S. Collection No. 46 c

Substance—Palm leaf. Size—15½ × 2 inches. Leaves—36. Lines—12 to a Page. Script—Grantha. No. of Granthas—1600 Author—Aśvatthabudha. Incomplete. Not printed

Beginning:

श्रीमद्गुरुचरणारविन्दाभ्यां नमः

यो रक्षोगणपीड्यमानभुवनं त्रातुं रघूणां कुले
श्रीरामाख्यमहेश्वरो विजयते लक्ष्मीसनाथस्सदा ।
तं भक्तार्ति(विभञ्जनैकनिपुणं) सीतापतिं सुन्दरं
काकुत्स्थं करुणानिधिं प्रणमतो भीतिः कुतो वा भवेत् ॥

श्रीमद्वत्सकुलप्रसूतमखिनः श्रीरामभद्रप्रभोः
पुत्रस्यार्यवरस्य दीक्षित...मणेः ।
पुत्रस्यास्य महामतेः बुधमहाहंभाववन्धच्छिदः
पुत्रोऽश्वत्थबुधस्तु साधु तनुते वादार्थभावान् मुदा ॥

श्रीगुरुचरणारविन्दाभ्यां नमः ।

...प्रत्यक्षादिना उपस्थितस्य समवायेन पदेन बोपस्थितस्य शाब्दबोधवारणाय विषयतासंबन्धेन शाब्दबोधं

प्रति विषयतासंबन्धेन पदनिरूपितवृत्ति......रणत्वमित्य-
वश्यं वाच्यं ।

End:

....विशेष्याभावस्य प्राप्तौ तद्व्यापकम् तस्य विशिष्टा-
भावस्यापि प्राप्तत्वेन तात्पर्यविषयत्वायोगात् । नखवि-
दलनाद्युपायस्य येषु व्रीहि...विशेष्यस्यावघाताभावस्य
विदलनाद्युपायान्तरप्रसक्तिप्रसञ्जितस्य विशेषणस्य च स-
त्त्वेन विशेष्याभावप्रयुक्तस्य विशेषणाभावप्रयुक्त.... ।।

Subject: Vādārthabhāvaḥ.

Remarks:—The Ms. is in a fairly good condition.

Nothing is known of the author of this tract, Vādārthabhāva, except that he is called Aśvattha & that he is the great grandson of one Rāmabhadra of the family of Vatsa.

।। विधिवादः ।।

6636. VIDHIVĀDAḤ.

Burnell's Catalogue No. 2244. Page 120. Left column.

Substance—Paper. Size—10 × 3¾ inches. Sheets—61. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—Rāmacandrasūrī. Incomplete. Not printed.

Beginning:

श्री वेदव्यासाय नमः ।।

ओदनकामः पचेत स्वर्गकामो यजेतेत्यादिविधिवाक्यं
पाकयागादौ प्रवर्तकं । तस्य च तथात्वं न साक्षात् ।
अभ्युत्पन्नानां ततोऽप्रवृत्तेः ।

End .

तादृशस्य नित्यस्यासम्भवेन तस्य विश्वजिन्न्यायेन स्वर्गसाधनत्वं कल्प्यते प्रत्यवायपरीहाररूपेष्टसाधनत्वस्यैव तत्र विध्यर्थत्वसंभवात । तज्ज्ञानादेव तत्र प्रवृत्त्युपपत्तेश्चेति ॥

Colophon:

समाप्तोऽयं विधिवाद: ॥

Subject. Vidhivāda.

Remarks:—The Ms. is in a fairly good condition.

Evidently a south Indian Brāhmaṇa, of perhaps the 17th or the 18th century, Rāmacandrasūri is the author of the Vidhivāda noticed above After refuting the views of philosophers belonging to other schools of thought, the author determines the meaning of Vidhi in the Nyāya system. Perhaps he is identical with Rāmabhadra, the author of Siddhānta Sāra, who had another name, Rāmacandra.

॥ सव्यभिचारलक्षणवादः ॥

6637. SAVYABHICĀRALAKṢAṆAVĀDAḤ.

Burnell's Catalogue No. 2296. Page 117. Right column. **Substance**—Paper. Size—$11\frac{1}{4} \times 5$ **inches.** Sheets—**14.** Lines—9 to a **Page.** Script—Devanāgarī. No. of — **Granthas** 200. Author—Venkaṭācārya. Complete, Not printed.

Beginning:

श्रीगणेशाय नमः

चिन्तामणेरुत्तरखण्डलग्ने
सामान्यतस्सव्यभिचारचिह्ने ।
गादाधरे दीधितिटिप्पणे नः
शङ्का समुन्मीलति दुर्निवारा ॥

साध्यसंशयजनककोटिद्वयोपस्थापकपक्षधर्मताज्ञान-विषयत्वे सति हेत्वभिमतस्स इति चिन्तामणौ पूर्वपक्षे सव्यभिचारसामान्यलक्षणं स्थितम् । तत्र साध्यसंशय-जनकत्वप्रयोजकत्वं कोटिद्वयोपस्थापकत्वे विवक्षितमिति वक्ष्यमाणदूषणपरिहाराय सर्वे सम्प्रतिपन्नम् । तदिदं किं यथाश्रुतरीतिपरिग्रहेण संभवति उत अन्यथेति संशये अन्यथेत्येव भट्टाचार्याः ॥

End:

तत्तदुद्देश्यतावच्छेदकधर्मिकतत्तद्विधेयतावच्छेदकप्रयो-जकतासंसर्गकसमानाधिकरणवाक्यजन्यशाब्दबुद्धित्वाव-च्छिन्नं प्रति तत्तद्विधेयपदप्राथम्याविशिष्टोद्देश्यताव-च्छेदकविशिष्टोपस्थापकशब्दसमभिव्याहृतविधेयतावच्छेद-कविशिष्टोपस्थापकसमानाधिकरणशब्दत्वरूपाकाङ्क्षाज्ञानस्य करणताकल्पने अनन्तगौरवरूपानन्तदोषापत्तेः । उद्देश्य-प्राथम्यनियमस्य महता ग्रन्थकृता दूषितत्वाच्च साध्यसंशय-जनकेत्यादेः अस्मदुक्तार्थपरिग्रह एव वाक्यविदां युक्त इति प्रतिभाति

Colophon:

चिह्नरवादः शिरोमणि वेङ्कटाचार्यकृतः ॥

Subject: The definition of the Hetvābhāsa, called Savyabhicāra as given in Maṇi, Dīdhiti and Gadādhara's works is discussed here by one Śiromaṇi Veṅkaṭācārya.

Remarks—The Ms. is in a fairly good condition.

॥ सव्यभिचारलक्षणवादः ॥

6638. SAVYABHICĀRALAKṢAṆAVĀDAḤ.

Burnell's Catalogue No. 2297. Page 120. Left column. Substance—Paper. Size—11 × $4\frac{3}{4}$ inches. Sheets—11. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—180. Author—Appāśāstrin. Incomplete. Not Printed.

Beginning:

श्रीगणेशाय नमः ।

साध्यसन्देहजनककोटिद्वयोपस्थापकपक्षधर्मताज्ञानविषयत्वे सति हेत्वभिमतस्स इति मणिवाक्यम् । अत्र दीधितिः । कोटिद्वयोपस्थापकं सत् साध्यसन्देहजनकं साध्यसन्देहजनककोटिद्वयोपस्थितिजनकमिति यावत् इति । तत्र भट्टाचार्याः— साध्यसन्देहजनकेत्यादि यथा श्रुतमूलात् साध्यसन्देहजनकत्वकोटिद्वयोपस्थापकत्वोभयवैशिष्ट्यं प्रत्याख्यते । तत्र च वक्ष्यमाणाति 'व्याप्तेर्दुर्वारत्वम्' इत्यादिना । 'अतो अन्यथा व्याचष्टे' इत्यन्तेन दीधितिं अवतारयामासुः ॥

End:

प्रकृतानुमितितद्विरोधित्वाभावेन तद्विरोध्यनुमिति-

जनकत्वाभावेन च प्रतिपक्षलक्षणासंस्पर्शेन भवदुक्तानुमानस्य प्रकृतानुपयोगमिति सदसद्विवेचनचतुरैः निर्मत्सरैः सुधीभिः सम्यग्विभावनीयम् ॥ अन्यदपि यत्किञ्चित् गौरवाद्यापादनम् । तत्तु परिहृतप्रायत्वात् अतिविस्तरभयाच्च उपेक्षितं इत्यलं पल्लवितेन ।

Colophon:

अण्णाशास्त्रिकृतचिह्नर (*Sivan*) वादः

Subject: Savyabhicāralakṣaṇavāda.

Remarks: —The Ms. is in a fairly good condition.

॥ सव्यभिचारलक्षणवादः ॥

6639. SAVYABHICĀRALAKṢAṆAVĀDAḤ.

Burnell's Catalogue No. 2298. Page 120. Left column. Substance—Paper. Size—10×4½ inches. Sheets—11. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—180. Author—Appāśāstrin. Incomplete. Not printed.

Beginning, end, colophon and subject—Same as No. 6638.

Remarks:—The Ms. is in a fairly good condition.

॥ सङ्कीर्णवादाः ॥

MISCELLANEOUS TRACTS.

॥ अनुमानखण्डव्याख्या ॥

6640. ANUMĀNAKHAṆḌAVYĀKHYĀ.

Burnell's Catalogue No. 10946. Page 121. Right column. Substance—Palm leaf, Size—$18\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—23. Lines—8 to a Page. Script—Grantha. No. of Granthas—460. Author—?. Complete. Not printed.

Beginning:

नन्वत्र पूर्ववादिना मीमांसकमसकृद्दर्शनव्याप्तिग्राहकतायाः स्वयमेव निराकरणात् अनुमानप्रामाण्योपसंहाराच्च नापि चार्वाकः सकृद्दर्शन........क्वचिदुपपादनादित्यत आह ॥ अस्त्विति ॥ सकृद्दर्शनगम्यत्वाङ्गीकारभ्रमं वारयति । सकृद्दर्शनेति । प्रत्यभिज्ञायामिवेति ॥

End.

ननु तत्राविशेषितेनेति विशेषणात् कथं तत्संग्रह इत्याशंक्याह । स्वयं लक्षणेति । तत्रे...लक्ष्यतावच्छेदक इत्यर्थः । अन्यथेति । स्वविवक्षितलक्षणानुरोधेन लक्ष्यतावच्छेदकनिर्वचन इत्यर्थः । स्वव्यभिचारमात्रेण साक्षात् शुद्धसाध्यव्यभिचारानुमितिजनकत्वमित्यर्थः ॥

Subject: Anumānakhaṇḍavyākhyā.

Remarks:—The Ms. is in a fairly good condition.

॥ अनुमाननिरूपणम् ॥

6641. ANUMĀNANIRŪPAṆAM.

Burnell's Catalogue No. 10947b. Page 121. Right column. Substance—Palm leaf. Size—$17\frac{3}{4} \times 1\frac{3}{4}$ inches. Leaves—9. Lines—8 to a Page. Script—Grantha. No. of Granthas—168. Author—?. Incomplete. Not printed.

Beginning:

प्रत्यक्षानुमानयोरुपजीव्योपजीवकभावसंगत्या प्रत्यक्षानन्तरमनुमानं निरूप्यते । यद्यपि लिङ्गपक्षव्याप्तिज्ञानादीनामनुमितिरूपत्वनियमे तस्याप्रसङ्गेन प्रत्यक्षरूपत्वमंगीकरणीयम् । अतीन्द्रियादिसाध्यकस्थलेऽपि परंपरया प्रत्यक्षापेक्षितत्वमिति ॥

End:

तासां धूमत्वावच्छेद्यत्वात् । तादृशप्रतियोगितात्वावच्छिन्नानतिरिक्तवृत्तित्वात् ।

Subject: Anumānanirūpaṇa.

Remarks:—The Ms. is in a fairly good condition.

॥ अन्यथाख्यातिवादः ॥

6642. ANYATHĀKHYĀTIVĀDAḤ.

Burnell's Catalogue No. 10952a. Page 121. Right column Substance—Palm leaf. Size—$13\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—28. Lines—6 to a Page. Script—Grantha. No. of Granthas—250. Author—?. Incomplete. Not printed.

Beginning:

...स्वतन्त्रान्वयव्यतिरेकादिष्टज्ञानं हेतुरेव न त्वितर-
हेतुतावच्छेदकमन्यथासिद्धम् । न हीष्टज्ञानमादायैव भेदा-
ग्रहस्यान्वयव्यतिरेकौ० ॥

End:

रसनगतपित्तद्रव्यस्योद्भूतपित्तरसस्य वायूपनीतसुर-
भिद्रव्यस्य वा प्रत्यक्षतापत्तेः । मैवम् । नोद्भूतरूपत्वं तथा
नयनगतपित्तद्रव्यस्य प्रत्यक्षतापत्तेः। अस्तु वा उद्भूतस्प-
र्शवत्त्वं तन्त्रम् । न चैवं प्र... ॥

Colophon: Leaf No. 7.

इत्यन्यथाख्यातिवादः ॥

Subject. Anyathākhyātivāda.

Remarks:—The Ms. is in a fairly good condition. The other work contained herein is:—

हेत्वाभासव्याख्या ।

॥ असमवायिकारणनाशाद्द्रव्यनाशवादः ॥

6643. ASAMAVĀYIKĀRAṆANĀŚAD-DRAVYANĀŚAVĀDAḤ.

Burnell's Catalogue No. 2292. Page 120. Right column. Substance—Paper. 12×6 inches. Sheets—7. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—120. Author—?. Complete. Not printed.

Beginning.

श्रीगणेशाय नमः ॥

असमवायिकारणनाशादेव द्रव्यनाशः । द्यणुकनाश-स्थले समवायिकारणनाशस्यासंभवात् । तत्रासमवायि-कारणनाशस्य हेतुत्वे कल्प्यमाने लाघवाद्द्रव्यनाशस्त-स्यैव कार्यतावच्छेदकत्वं कल्प्यते । न तु द्यणुकनाशस्य गौरवात् ।

End:

एवञ्चापरमपि लाघवं तत्तत्पुरुषीयत्वादिमिश्रिते तत्तद्भूम्यादिमिश्रितेवा बाधनिश्चयप्रतिबध्यतावच्छेदके-ऽपि रूपदोषविशेषस्यानिवेशादिति पुनरासाकीनाभिनवः पन्थाः ॥

Colophon:

इति असमवायिकारणनाशाद्द्रव्यनाशवादः समाप्तः ॥

Subject: Asamavāyıkāraṇanāśāddravyanāśavāda.

Remarks:—The Ms. is in a fairly good condition. On the title page is given·

हे पुस्तक श्रीमन्तराजेश्रीशरभोजिमहाराजसाहेबयांच्य कारकर्तांत लि-हिलें अस्सें ।

॥ आकांक्षावादः ॥

6644. ĀKĀṄKṢĀVĀDAḤ.

Burnell's Catalogue No. 10951a. Page 121. Right column. **Substance**—Palm leaf. Size—16¼ × 1½ inches. Leaves—11 (क-ट). Lines—9 to a Page. Script—Grantha. No. of Granthas—300. Author—? Incomplete. Wants end. **Not printed.**

Beginning:

ॐ आकाङ्क्षाया लक्षणमुच्यते । पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकाङ्क्षा । अन्वयाननुभावकत्वमात्रे कृते घटः कर्मत्वमित्यत्रातिव्याप्तिः । ततः पदान्तरव्यतिरेके घटः कर्मत्वमित्यन्वयाननुभावकत्वं न पदव्यतिरेकप्रयुक्तम् किं स्वरूपायोग्यत्वप्रयुक्तम् । अन्यथा पदान्तरसमभिव्याहारदशायां निराकाङ्क्षस्यान्वयबोधकत्वापत्तेः ।

End:

अत्र त्ववच्छेदकान्तराभावेनाकाङ्क्षाविशिष्टशब्दत्वमेव जनकतावच्छेदकमित्युक्तत्वात् । तस्मादाकांक्षाविरहादेव घटः कर्मत्वमित्यादेः स्वरूपयोग्यत्वम् । तत्र च पदव्यतिरेकप्रयुक्तत्वविशेषणं विना न तद्विरह इति तद्विशेषणमावश्यकमेवेति युक्तः पन्थाः ॥ तदेतत्सर्वमभिसन्धायाह ॥ इतिसंक्षेप इति ॥ नन्वग्निना सिञ्चेदित्यादेरपि... ।

Subject: Ākāṅkṣāvāda.

Remarks:—The Ms. is in a fairly good condition. The other works contained herein are:

1 Ākāṅkṣāvāda,

2 A commentary on some work,

and some fragmentary leaves at the beginning containing the same subject.

॥ आकाङ्क्षावादः ॥

6645. ĀKĀṄKṢĀVĀDAḤ.

Burnell's Catalogue No. 10951. Page 121. Right column. Substance— Palm leaf. Size—16¼×1½ inches. Leaves—31. Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—560. Author—? Incomplete. Not printed.

Beginning:

पदान्तरव्यतिरेकप्रयुक्ततात्पर्यविषयान्वयाननुभावकत्व-माकाङ्क्षा । ....ङ्क्षा घटमानयेत्यत्र वर्तते । घटमिति पदस्यानयेति पदं विना आनयेति पदस्य घटमिति पदं विना तात्पर्यविषयघटकर्मकानयनक्रियाकसंसर्गान्वयाननु-भावकत्वं वर्तत इति लक्ष्ये लक्षणसमन्वयः ।

End:

जन्यत्वाभावापेक्षया शरीरजन्यत्वाभावस्यातिरिक्तत-या एकस्मिन् धर्मिणि जन्यत्वाभावत्वशरीरजन्यत्वाभाव-त्वयोः समावेशाभावेन व्यर्थविशेषणत्वशङ्कानवकाशात् । ननूभयोस्तुल्यबलत्वाभावान्न सत्प्रतिपक्षता । तथा हि कर्तृजन्यत्वावच्छेदकं कार्यत्वं घट.... ।

Subject: Ākāṅkṣāvāda.

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see Remarks under No. 6644

॥ आख्यातार्थविचारः ॥

6646. ĀKHYĀTĀRTHAVICĀRAḤ.

N. S. Collection No. 35b. Substance—Paper. Size—12¼×4

inches. Sheets—6. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—? Incomplete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

संसर्गाभावश्चान्योन्याभावश्च नञोर्थः । तत्र अन्वयिता-वच्छेदकावच्छिन्नप्रतियोगिताक....वति न घटः नीलो न घटो न घटः इत्याद्यव्यवहारात् । इह नीलो घट इति न पीतो घट इति पीतो घटो न नीलो घट इत्यादिव्यव-हाराच्च ।

End:

कथं....वैकत्वगोत्वोभयविशिष्टबुद्धौ गोपदजन्यत्वसङ्के-तः । शुद्धगोत्वावच्छिन्ने गोपदस्य न संगतिः । गौरित्य-त्रैकवचनसहकृतेन गोपदेन तदुभयप्रकारकबुद्धिजन-नात् । तदितरप्रकारकत्वानि... ।

Subject: Ākhyātārthavicāra.

Remarks:—The Ms. is in a fairly good condition.

॥ आख्यातवादः ॥

6647. ĀKHYĀTAVĀDAḤ.

J. L. Collection No. 923.

Substance—Paper. Size—12¾ × 6½ inches. Sheets—5 (1-4 & 10). Lines—16 to a page. Script—Devanāgarī. No. of Granthas—240. Author—? Incomplete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ।
इति वात्सल्यवान् बिभ्रत्तद्रूपं पातु माधवः ॥

कोलाहलोऽत्र कुधियां न प्रत्यूहो विवेकिनां ।
कलिदोषो रमानाथ दासमीष्टे न वीक्षितुम् ॥ २ ॥

आख्यातस्य कृतौ शक्तिः न तु कर्तरि । कृत्याश्रयत्वमेव हि कर्तृत्वं । तच्च कृतिरूपमित्यनन्तकृतीनां शक्यत्वावच्छेदकत्वे गौरवादिति तार्किकाः । न चैवं रथोगच्छतीत्यादावचेतने रथे कृतेर्बाधात् व्यापाराश्रयत्वादौ लक्षणायां लक्ष्यतावच्छेदकगौरवेण साम्यमिति वाच्यम् ।

End:

अतो युगपत्तेषां स्मरणमित्यभ्युपेयं । तदुक्तम् ।

"वृद्धा युवानः शिशवः कपोता
यथा खलेऽमी युगपत्पतन्ति ।
तथैव सर्वे युगपत्पदार्थाः
परस्परेणान्वयिनो भवन्ति ॥ इति ॥

एवं च गिरिर्भुक्तमग्निमान्देवदत्तेनेत्यादावपि समूहालंबने पदर्थानां विषयत्वाविशेषात् अत्र असत्यभावाच्छाब्दबोधाभाव इति तार्किकप्रवादः ।

Subject: Ākhyātavādaḥ.

Remarks:—The Ms. is in a fairly good condition.

॥ आत्मत्वजातिविचारः ॥

6648. ĀTMATVAJĀTIVICĀRAḤ.

S. K. Collection No. 19.

Substance—Paper. Size—9×3½ inches. Sheets—6. Lines—12 to a page Script—Devanāgarī. No. of Granthas—250. Author—?. Complete. Not printed.

Beginning;

श्रीगणेशाय नमः ।

नन्वात्मत्वजातौ किं प्रमाणम् । अथ ज्ञानसमवायिकारणतावच्छेदकत्वेनात्मत्वजातिसिद्धिः । कथमन्यथा आत्मभिन्ने ज्ञानं नोत्पद्यत इति चेन्न । आत्मभिन्नेहि स्मृतेरनुभवस्य वा उत्पत्तिरापद्यते । न तावदाद्यः । स्मृतिं प्रति पूर्वानुभवे जन्यसंस्कारस्य समवायघटितसामानाधिकरण्यप्रत्यासत्त्याऽवश्यहेतुत्वेन तत्र संस्काराभावादेव स्मृत्यनुपपत्तेः ।

End:

भावे वा जन्यसत्त्वाद्यवच्छिन्नं प्रति द्रव्यत्वेन हेतुतयैव तदुपपत्तेः । अदृष्टस्य गगनादिसाधारण्याभावादनापत्तौ लाघवेन द्रव्यत्वादेरेवावच्छेदकस्योचितत्वादिति दिक् ।

Colophon:

इत्यात्मत्वजातिविचारः ।

Subject: Ātmatvajātivicāra.

Remarks:—The Ms. is in a fairly good condition. After the colophon is given:—

'शेषभट्टपुत्रबालाख्यस्य'

॥ उपाधिवादः ॥

6649. UPĀDHIVĀDAḤ.

Burnell's Catalogue No. 2268. Page 120. Right column.

Substance—Paper. Size—10¼ × 4¼ inches. Sheets—12. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—260. Author—? Complete. Not printed.

Beginning:

अथोपाधिर्निरूप्यते । उपाधिज्ञानं व्याप्तिज्ञाने ग्राह्या-भावानवगाहितया न साक्षात्प्रतिबन्धकम् । अनौपाधि-कस्याव्याप्तित्वात् किन्तु व्यभिचारानुमितिद्वारानतु-मितिदशायामनुमित्यप्रतिबन्धकत्वेन न प्रतिबन्धकता-नियमघटितहेत्वाभासतोपाधिरिति वक्ष्यति । अत एव यद्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारः स उपा-धिरिति मणिकृत ऊचुः ।

End:

अत्र त्वन्योन्यस्य हेतुतावच्छेदकप्रवेशे बाधकाभावः । प्रत्युताभावद्वयापेक्षया एकाभावहेतुतैव ज्यायसी यच्च पक्ष-तापदप्रवृत्तिनिमित्तत्वलाघवमभ्यधायि तदज्ञानात् । न ह्यत्र परमेश्वरसाङ्केतिक एव सलत्वधुरेव(?)कल्पेत । अपि तु शास्त्रकारपरिभाषा तत्र च गौरवमतन्त्रमेव । अत एव मणिकं... ॥

Subject: Upādhivāda.

Remarks:—The Ms. is in a fairly good condition.

॥ चतुःषष्टिवादाः ॥

6650. CATUSSASTIVĀDAH.

Burnell's Catalogue No. 10959. Page 121. Left column. Substance— Palm leaf. Size—$18\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—75. Lines—9 to a Page. Script—Grantha. No. of Granthas —2700. Author—? Complete. Not printed.

Beginning:

आचारानुमिते नान्या फलत्वे सति सफलत्वादित्यनु-मानेन च मङ्गलस्य समाप्तिः फलम् । न च तत्रासिद्धिः । लिंगे कृत्या विशेष्यस्यान्यानिच्छाकालीनकृत्याविशेष-णस्य च प्रसाधनान्न च स....त्वात् । सर्वकाम्य स्वर्ग एव विश्वजिन्न्यायायादस्तु । सर्व एव हि कामनाविशे-षणम्, न सर्वत्वम् । विश्वजिति च नान्यप्रसक्तिः ।

End:

चेष्टा तु स्मारकतयैवोपयोगान्नपृथङ्मानम् । यद्वा समया-धीनप्रवृत्तिकत्वमेव शब्दस्य मानविभाजकमिति चेष्टालि-प्यादेः प्रामाण्येऽपि शब्दान्तर्भाव एव । एवं संभव ऐति-ह्यादेरप्यनुमानं शब्दाद्यन्तर्भाव इति न मानचतुष्ट्वहा-निरिति दिक् ।

Subject: Catussastivāda.

Remarks:—The Ms. is in a fairly good condition. There is a loose sheet at the end containning the index of Vādā's as follows:

प्रत्यक्षखण्डे

मंगलवादः
प्रामाण्यवादः
अन्यथाख्यातिवादः
प्रत्यक्षलक्षणवादः
संनिकर्षग्रन्थः
समवायवादः
योग्यानुपलब्धिवादः
पृथक्प्रामाण्यवादः
अभावाधिकरणवादः
विशेषणतावादः
आलोकवादः
वायुप्रत्यक्षवादः
सुवर्णतैजसत्ववादः
मनोऽणुत्ववादः
स्वप्रकाशत्ववादः
निर्विकल्पकवादः
विशेषणतावादः
तत्तेदन्तावादः

अनुमानखण्डे

व्याप्तिवादः
भूयोदर्शनवादः
उपाधिवादः
पक्षतावादः
परामर्शवादः
लिंगकरणतावादः
केवलान्वयिवादः
केवलव्यतिरेकिवादः
अवयवग्रन्थः
हेत्वाभासवादः
ईश्वरवादः
शक्तिवादः
कारणतावादः
मोक्षवादः

शब्दखण्डे—

शब्दस्वातन्त्र्यवादः
आकांक्षावादः
योग्यतावादः
आसक्तिवादः
पदाध्याहारवादः
तात्पर्यवादः
शब्दानित्यत्ववादः
वेदापौरुषेयत्ववादः
उच्छिन्नशाखावादः
प्रलयवादः
विधिवादः
अपूर्ववादः
सिद्धार्थवादः

अन्वितशक्तिवादः

पदशक्तिवादः

योगरूढिवादः

साधुत्ववादः

अपभ्रंशवादः

लक्षणावादः

आख्यातवादः

उपसर्गवादः

आहत्यचतुःषष्टिवादाः ॥

Numbers of Vādas as found in the above given list are only 58. The Index to the Upamānakhaṇḍa is wanting.

॥ ज्ञानप्रामाण्यवादः ॥

6651. JÑĀNAPRĀMĀṆYAVĀDAḤ.

Burnell's Catalogue No. 2252. Page 120. Right column. **Substance**—Paper. Size—$10\frac{1}{4} \times 4\frac{1}{4}$ **inches**. Sheets—8. Lines—14 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—?. Incomplete. Wants beginning. Not printed.

Beginning:

....ष्टपरार्थस्यैव विधेयतया तादृशवाक्यजन्यशाब्दबो-
धवह्निपर्वतवृत्तित्वयोः उद्देश्यविधेयभावासंभवात् अन्य-
था वह्निः पर्वते पर्वते वह्नि रित्येतादृशवाक्यजन्यशाब्दबो-
धयोः विशेषणविशेष्यभावावैलक्षण्येन वैलक्षण्यानुपपत्तेः ।

End:

उक्तसमूहालम्बने च शुक्त्यंशावच्छेदेनाप्रामाण्यग्रहे
ऽपि रजतांशावच्छेदेन तदग्रहात् न दोष इति अलमिति
वृद्धिविस्तरेणेति दिक्.... ॥

Colophon:

ज्ञानप्रामाण्यवादः समाप्तः ।

गौलकी भीमाचार्य पुस्तकम् ।

Subject. Jñanaprāmāṇyavāda.

Remarks:—The Ms. is in a fairly good condition,

॥ तर्कप्रकरणं ॥

6652. TARKAPRAKARAṆAM.

Burnell's Catalogue No. 10964. Page 128. Right column. Substance—Palm leaf. Size—20 × 1½ inches. Sheets—**45** (31-76, 33rd wanting). Lines—7 to a Page. Script—Nandināgarī. No. of Granthas—460. Author—? Incomplete. Not printed.

Beginning:

आह । विशेषेणेति । ... मात्रादिशब्दे व्यभिचारा-
दाह । एकेति । गुणपदम् । .... समवाये व्यभिचारवार-
णाय पुरुष(?)मनःकर्मणि व्यभिचारवारणाय गुणपदम्
...न चैकमपि वुदीये(?)वेगे व्यभिचारनिरन्तर कर्मसंतान
...तन्मते वेगत्वादिति । तन्न ।

End:

अननुगतत्वेन तद्देवता... न च द्वितीयकर्त्रादिक...
तादृशमर्तिकाचे...प्रसक्तत्वात्तादृश.... ....।

Subject: Tarkaprakaraṇam.

Remarks:—The Ms. is in a fairly good condition. This Ms. could not be identified. Neither the subject matter nor its author

are to be gathered definitely. The name found on the title page is given.

॥ त्वङ्मनोयोगस्य ज्ञानहेतुत्वखण्डनम् ॥

6653. TVAṄMANOYOGASYA JÑĀNA-HETUTVAKHAṆḌANAM.

J. L. Collection No 924.

Substance—Paper. Size—$6\frac{1}{4} \times 4$ inches. Sheets—6. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—75. Author—? Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

त्वङ्मनो योगस्य ज्ञानत्वावच्छिन्नं जन्यज्ञानत्वावच्छिन्नं प्रति वा हेतुत्वे मानाभावः । अथ स्वापोत्तरद्वितीयादिक्षणे ज्ञानोत्पत्तिवारणाय जन्यज्ञानमात्रं प्रति त्वङ्मनोयोगस्य हेतुत्वमावश्यकम् ॥

End:

तथाप्यतिरिक्तवैजात्यकल्पनामपेक्ष्य मनस्त्वेनैव हेतुना वा लघुत्वान् । तदप्यसत् । स्वापोत्तरज्ञानप्रसङ्गस्यो- (क्त क्र)मेण संभवात् । शरीरमनःसंयोगस्याप्यतिरिक्तकारणत्वे मानाभावादिति संक्षेपः ॥

Colophon:

इति त्वङ्मनोयोगस्यजन्यज्ञानत्वखण्डनम् ॥

Subject: Tvaṅmanoyogasya Janyajñānatvakhaṇḍanam.

Remarks:—The Ms. is in a fairly good condition.

॥ नवत्वसङ्ख्याविचारः ॥

6654. NAVATVASAṄKHYĀVICĀRAḤ.

Ms. not noticed by Burnell. No. 15561.

Substance—Paper. Size—10 × 4 inches. Sheets—2. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—45. Author—? Complete. Not printed.

Beginning:

श्रीगणाधिपतये नमः ।

पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैवेति नैयायिकानां सिद्धान्तः। ननु नवैवेति विशेषण मतिरिक्त-द्रव्यव्यवच्छेदार्थमिति वक्तव्यम् । प्रयोजनान्तराभावात् । तत्र व्यवच्छेदार्थत्वं वदता वक्तव्यम् । अतिरिक्तद्रव्यं प्रसिद्धं वा न वा । नाद्यः । प्रसिद्धस्य निषेधायोगात् ।

End:

तस्मात्तमो नामातिरिक्तं द्रव्यान्तरं सिद्धम् । तथा च व्यभिचारोदुर्वार एवेति चेत् । अत्राभाति— तमो न रूपिद्रव्यम् । आलोकासहकृतचक्षुर्ग्राह्यत्वात् । आलोका-भाववत्—इत्यनुमानेन रूपवत्त्वप्रत्ययस्य बाधितत्वविषयत्वात् ॥

Colophon: Navatvasaṅkhyāvicāraḥ.

Remarks:—The Ms. is in a fairly good condition.

॥ निरुक्तिव्याख्यानम् ॥

6655. NIRUKTIVYĀKHYĀNAM.

Burnell's Catalogue No. 10965. **Page** 121. Right **column.** **Substance**—Palm leaf. Size—$17\frac{1}{4} \times 1\frac{1}{2}$ **inches.** Sheets—17 (2-18). Lines—10 to a Page. Script—Grantha. No. of Granthas—420. Author—? Incomplete. Not printed.

Beginning:

....अज्ञातकरणजन्यज्ञानान्यत्वेऽतिव्याप्तिः । अत उक्त विशेषेति । उक्तोपाये...न दोषः ।

End:

तत्रातिव्याप्तमिदं लक्षणम् । तथापि तन्मात्रविषयत्वं विवक्षितम् । तथा च घटादीनामयं घट इत्यादिरूपेऽपि ...स्य तु असाधारणस्वरूप नञर्थमात्रप्रतीतिविषयत्वमेवेति नासंभवः ❋ ❋ प्रमेयत्वम् ॥

(महेश्वरेऽष्टौ मनसस्तथैव वायोर्न)वैकादश तेजसो गुणाः ।
(दिक्का)लयोः पञ्च षडेवचाम्बरे जलक्षितिप्रा(णभृतां चतुर्दश) ॥

Subject: Niruktivyākhyāna ?

Remarks:—The Ms. is in a very decaying condition.

Neither the author nor the subject of this work can be definitely ascertained. The title page says that the Ms. represents a work called Niruktivyākhyāna.

॥ पक्षतावादः ॥

6656. PAKṢATĀVĀDAḤ.

Ms. not noticed by Burnell No. 13903.

Substance—Paper. Size—10⅞ × 5½ inches. Sheets—5. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—85. Author—? Complete. Pūrvapakṣa only. Not printed.

Beginning

श्रीगणेशाय नमः ॥

पर्वतो वह्निमान् धूमादित्यादौ पक्षसाध्यनिश्चयदशायां पक्षे साध्यानुमित्यनुपपत्तेः साध्यसंशयरूपपक्षतायाः अनुमितिहेतुत्वं वाच्यम् । तत्र साध्यसंशयपदेन साध्यप्रकारकसंशयस्योपादाने साध्यविशेष्यकसंशयस्यासंग्रहः । साध्यविशेष्यकसंशयोपादाने साध्यप्रकारकसंशयसंग्रहः ।

End:

पर्वतत्वावच्छिन्नोद्देश्यकंवह्नित्वावच्छिन्नाविधेयताकानुमितौ कस्यापि संशयस्य प्रतिबन्धकतायां आहार्याप्रामाण्यज्ञानानास्कन्दितानिश्चयसाधारणपर्वतत्वावच्छिन्नविशेष्यता निरूपित संयोगसंबन्धावच्छिन्नवह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वव्यापकत्वाभावेन पक्षतालोपप्रसङ्गादिति पूर्वः पक्षः ॥

Colophon:

समाप्तः पूर्वः पक्षः ।

Subject: Pakṣatāvāda.

Remarks:—The Ms. is in a fairly good condition.

॥ प्रतियोगिज्ञानकार्यकारणभावरहस्यम् ॥

6657. PRATIYOGIJÑĀNAKĀRYAKĀRAṆA-BHĀVARAHASYAM.

J. L. Collection No. 925.

Substance—Paper. Size—7¾ × 4 inches. Sheets—10. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—? Complete. Not printed.

Beginning.

श्रीगणेशाय नमः ॥

प्रतियोगिज्ञानशून्यकाले नेत्याकारकप्रतियोग्यामिश्रिताभावलौकिकप्रत्यक्षवारणायाभावलौकिकप्रत्यक्षं प्रति प्रतियोगिज्ञानस्य हेतुत्वमङ्गीकुर्वन्ति प्राचीनाः ॥

End:

निष्प्रयोजकत्वाच्चेति । नेत्याकारकप्रत्यक्षापत्तेस्तु प्रकारकान्तरेण वारितत्वादिति किमाधिकजल्पनेन । एवमुपदर्शितरीत्या कार्यकारणभावकल्पने न घटत्वप्रकारकज्ञानकाले पटाभावप्रत्यक्षस्याप्यापत्तेरिति ।

Colophon:

इत्यभावज्ञाने प्रतियोगिज्ञानकार्यकारणभावविचाररहस्यं संपूर्णम् ॥

Subject: Pratiyogijñānakāryakāraṇabhāvarahasyam.

Remarks;—The Ms. is in a fairly good condition.

॥ प्रमाणादिनिरूपणम् ॥

6658. PRAMĀṆĀDINIRŪPAṆAM.

Ms. not noticed by Burnell. Ms. No. 15562.

Substance—Paper. Size—10 × 3¾ inches. Sheets—51 (34-84). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—? Incomplete Not printed.

Beginning:

...ननु घटाद्यनुपलब्ध्या घटाभावो गृह्यत इत्युक्ते तवानु...लब्धिः।

End:

ज्ञानस्य साकारतां निराकर्तुं निराकारतां प्रतिजानीते। सर्वमिति ॥ तत्र हेतुमाह— साकार इति । साकारज्ञानवादस्य तीर्थकारैः.. ।

Subject: Pramāṇādinirūpaṇa.

Remarks:—The Ms. is in decaying condition.

This is a commentary on some unidentified work.

॥ बाधरहस्यम् ॥

6659. BĀDHARAHASYAM.

Burnell's Catalogue No. 2258. Page 120. Right column.

Substance—Paper. Size—10×4 inches. Sheets—17. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—408. Author—? Incomplete. Wants end. Not printed.

Beginning:

श्रीगणेशाय नमः ।

तद्धर्मावच्छिन्नविशेष्यताकतदभाववत्तानिर्णयकाले तद्धर्मावच्छिन्नविशेष्यताकतद्विशिष्टबुद्धेरनुदयात् । पर्वतत्वावच्छिन्नाविशेष्यताकसंयोगादिसंसर्गवह्नित्वाद्यवच्छिन्नप्रकारता लौकिकज्ञानत्वावच्छिन्नप्रति...पर्वतत्वाद्यवच्छिन्नविशेष्यताकदैशिकविशेषणतासंसर्गकसंयोगादिसंसर्गावच्छिन्नवह्नित्वाद्यवच्छिप्रतियोगिताकाभावप्रकारकानाहार्याप्रामाण्यज्ञानानास्कन्दितनिर्णयत्वेन प्रतिबन्धकत्वं कल्प्यते ॥

End:

तथा च विशेषदर्शनाभावविशिष्टविपरीतज्ञानोत्तरप्रत्यक्षं प्रति इच्छात्वेन हेतुतामादाय विनिगमनाविरह इति चेदस्त्वेतादृशविनिगमनाविरहादिच्छाया ।

Subject: Bādharahasya.

Remarks:—The Ms. is in a fairly good condition.

॥ बाधरहस्यम् ॥

6660. BĀDHARAHASYAM.

P. A. Collection No. 245.

Substance—Paper. Size—10×4½ inches. Sheets—38. Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—900. Author—?. Complete. Not printed.

Beginning and subject same as No. 6659.

End:

ताहशप्रफलस्य प्रामाणिकत्वं तु अ..............

विशेषणं देयमिति ॥

Colophon:

बाधरहस्यं समाप्तम् ॥

Remarks:—The Ms. is in a fairly good condition.

॥ बाधविचारः ॥

6661. BĀDHAVICĀRAḤ.

Burnell's Catalogue No. 2254. Page 120. Right column. Substance—Paper. Size—9×3¼ inches. Sheets—20. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—475. Author—? Incomplete. Wants beginning. Not printed.

Beginning:

.. यत्तु मिश्रमते विपरीतनिर्णयत्वेन प्रतिबन्धकतायां विशेषदर्शनस्योत्तेजकत्वमावश्यकम्, अन्यथा विपरीतनिर्णयकाले विशेषदर्शनसत्वेऽपि प्रतिबन्धकसत्वेन निर्णयानुपपत्तेः। न च तत्र विपरीतनिर्णये विनष्ट एव प्रत्यक्षमुत्पद्यते। न तु तदव्यवहितक्षण इति वाच्यम्। तथा सति भ्रमसंशयोत्तरप्रत्यक्षंप्रति विशेषदर्शनस्य हेतुता-

मत इत्यादिग्रन्थकथनस्यासाङ्गत्यापत्तेः ।

End:

कायव्यूहस्थले चान्यशरीरावच्छेदेन तत्रात्मनि बाधा-
दिसत्वेऽन्यशरीरावच्छेदेनापि न तद्विशिष्टबुद्धि....पेयते ।
तदुत्पादे प्रमाणविरहात् तादृशफलस्य प्रामाणिकत्वे तु
अनायत्या चैत्रादिशरीरावच्छिन्नत्वं बाधादौ विशिष्टबुद्धौ
च विशेषणं देयम् ।

Colophon.

इति बाधविचारः समाप्ति.... । राघवेन्द्राय नमः ।

संवत् १७८० वैशाखशुद्धाष्टम्यां पूरितोऽयं विश्वनाथेन ॥

Subject: Bādhavicāra,

Remarks:—The Ms. is in a fairly good condition.

The Ms. was copied in A. D. 1683.

॥ मोक्षवादः ॥

6662. MOKṢAVĀDAḤ.

Burnell's Catalogue No. 10968. Page 121. Right column. Substance—Palm leaf. Size —16¼ × 1¼ inches. Leaves—7. Lines—10 to a Page. Script—Telugu. No. of Granthas—140. Author—? Incomplete. Not printed.

Beginning:

...त् । न च यावदाश्रयनाशात् तन्नाश इति युक्तः ।

यावत्तस्य नाशपरकत्वेनावच्छेदकत्वम् । यद्वा पुरुषसम-
वेतेनापि संस्कारेण स्वरूपसंबन्धात् ।

End:

अनुभावकतानास्तीति वदतः गुरोरपि लघुत्वमेव ।

Colophon: (Leaf ?)

मोक्षवादः समाप्तः ।

Subject: Mokṣavāda.

Remarks:—The Ms. is in a decaying condition.

॥ रत्नकोशवादः ॥

6663. RATNAKOŚAVĀDAḤ.

Burnell's Catalogue No. 2336. Page 121. Left column. Substance—Paper. Size—11¾ × 5½ inches. Sheets—56. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1680. Author—? Complete. Not printed.

Beginning:

परोक्षज्ञानं निश्चयात्मकमेवेति सिद्धान्तः । रत्नकोशका-
रास्तु सत्प्रतिपक्षसंवलनदशायां संशयात्मिकामनुमितिम-
ङ्गीकुर्वन्ति । तत्र संशयत्वस्य लिङ्गपरामर्शजन्यतावच्छे-
दकतया कथं ततः संशय उत्पत्स्यत इति तु नाशङ्कनी-
यम् । संशयत्वस्य जन्यतावच्छेदकत्वेऽपि एकधर्मिकवि-
रुद्धोभयव्याप्यवत्ताज्ञानदशायां अर्थवशादेकधर्मिकविरुद्धो-
भयधर्मप्रकारकज्ञानत्वरूपसंशयत्वावच्छिन्नोत्पत्तेरावश्यक-
त्वात्

End:

अपरकोप्यनुमितिसामग्र्यभावस्य सामग्रीव्याप्त्याव-
निवेशे उपदर्शितनानाविधगुरुतरशाब्दादिसामग्र्याभाव-
निवेशप्रसङ्गात् । तदपेक्षया लाघवेन अपरकोप्यनुमिति
सामग्र्यभावस्यैव निवेशयितुमुचितत्वात् इति न कथञ्चि-
दपि अनुमितेः संशयत्वोपपत्तिरिति कृतं पल्लवितेन ।

Colophon :

इति संशयानुमितिविचारः ।

Subject: Ratnakośavāda.

Remarks:—The Ms. is in a fairly good condition.

It is not known whether Ratnakośa is the name of a work or of its author. Certain views are definitely associated with that name and Gaṅgeśa refers to this view in his Anumānakhaṇḍa.

॥ विधिवादः ॥

6664. VIDHIVĀDAḤ.

Burnell's Catalogue No. 10953. Page Left column. **Substance**—**Palm leaf**. Size—14¼ × 1½ **inches**. **Leaves**—12 (40-51). **Lines**—8 to a Page. Script—Devanāgarī. **No. of Granthas**—290. Author—? Incomplete. Wants end. Not printed.

Beginning:

विधिवादः ॥ इदानीं प्रवृत्तिज्ञानं निरूप्यते । तत्र कार्य-

बोधातेऽन्यत्र लिङोऽन्वयितावच्छेदकावच्छिन्नाभावबोध-
कत्वनियमेऽपि अत्र व्युत्पत्तिवैचित्र्याभ्युपगमादिति प्राहुः ।

Colophon:

इति विधिवादः ।

Subject: Vidhivāda.

Remarks:—The Ms. is in a fairly good condition.

॥ विधिविचारः ॥

6666. VIDHIVICĀRAḤ.

S. S. Collection No. 46 b.

Substance—Palm leaf. Size—$15\frac{1}{2}\times 2$ inches. Leaves—11. Lines—11-12 to a page. Script—Grantha. No. of Granthas—550. Author—? Incomplete. Not printed.

Beginning:

....न क्षमन्ते । नित्येनाध्यापनेन नित्यस्य अध्याप-
नस्य प्रयोक्तुमशक्यत्वात् अनित्यमध्यापनं जीवनकाम-
स्य तत्राधिकारात् । तदाह मनुः—

"षण्णान्तु कर्मणां(त)स्य त्रीणि कर्माणि जीविका ।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥" इति ॥

End:

इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त इत्य-
त्रांगभूतस्यादानस्य अर्थप्राप्तस्य वैधबन्धनसमानकर्तृ-

कत्वं नास्ति । आर्थिकस्यानंगत्वेन प्रयोगविध्यसं-
ग्रहात् । अविज्ञातप्रायश्चित्त...षप्रायश्चित्ताप्रसक्तेश्च ना-
दानविधिः ॥

Subject: Vidhivicāra.

Remarks:—The Ms. is in a fairly good condition.

॥ विभक्त्यर्थविचारः ॥

6667. VIBHAKTYARTHAVICĀRAḤ.

S. S. Collection No. 46a.

Substance—Palm leaf. Size—15½ × 2 inches. Leaves—28. Lines—10-13 to a Page. Script—Grantha. No. of Granthas—1400. Author—? Incomplete. Not printed.

Beginning:

अथ दृश्यादिसमभिव्याहृतद्वितीयायाः लौकिकविषयि-
तार्थकत्वं सौरभं न पश्यतीत्यादौ सौरभादिनिरूपित
लौकिकविषयिताशालिचाक्षुषाद्यप्रसिध्या । आकाशं न
पश्यतीत्यादौ आकाशनिरूपितलौकिकविषयताया एव
अप्रसिध्या तादृशाविषयिताशालिचाक्षुषाश्रयत्वाभावरूप-
वाक्यार्थाप्रसिद्धिः ।

End:

....क्रियाविशेषघटित धर्मस्यान्वयितावच्छेदकत्वेऽपि
तदवच्छिन्नत्वस्य विशिष्टविशेषणतायाः अभावसंसर्गतया

मानसंभवेन सामञ्जस्यात् ।

Colophon: (Leaf No. 21)

इति द्वितीयाविभक्त्यर्थविचारः ।

Subject: A discussion on the implications of the accusative case; and some portion of the instrumental case.

Remarks:—The Ms. is in a fairly good condition.

॥ व्याप्तिग्रहोपायटिप्पणी ॥

6668. VYĀPTIGRAHOPĀYAṬIPPAṆĪ.

Burnell's Catalogue No. 2826. Page 121. Left column. Substance—Paper. Size—13 × 6½ inches. Sheets—21. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—? Complete. Not printed.

Beginning;

लाघवादित्यस्य हेतुं पूरयति ।

॥ प्रतियोगीति ॥ आदिपदात् प्रतियोगिवैयधिकरण्यपरिग्रहः । विशेषणविरहेणेति । अत्यन्ताभावगर्भव्याप्तिघटकीभूतात्यन्ताभावविशेषणस्यात्राप्रवेशेनेत्यर्थः ॥

End:

एकत्वस्य दुर्वचत्वादाह । विशेषेणतेति । हेतुतावच्छेदकसम्बन्धनिवेशे तु एतद्रूपाभिन्नं गुणत्वात् । महाकालान्याघटादित्यादावव्याप्त्यापत्तेरिति ध्येयम् ।

Colophon:

इति व्याप्तिग्रहोपायटिप्पणी समाप्तिमगमत् ।

Subject: Vyāptigrahopāyaṭippaṇī.

Remarks:—The Ms. is in good condition.

॥ व्याप्तिलक्षणम् ॥

6669. VYĀPTILAKṢAṆAM.

S. S. Collection No. 56. Substance—Paper. Size—12×4½ inches. Sheets—4. Lines—8 or 9 to a Page. Script—**Devanāgarī**. No. of Granthas—60. Author—?. Complete. **Not** printed.

Beginning:

व्याप्तिलक्षणम् ॥ हेत्वधिकरणवृत्त्यभावप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिः । अत्र यद्यपि वह्निमान् धूमादित्यादौ हेत्वधिकरणपर्वतादिवृत्त्यभावप्रतियोगित्व....

End:

गुरुधर्मस्यानवच्छेदकत्वादिति चेन्न । कम्बुग्रीवादिमन्नास्तीति प्रतीत्या कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताविषयीकरणेन गुरुधर्मस्यापि अवच्छेदकत्वस्वीकारादिति संक्षेपः ॥

Subject: Vyāptilakṣaṇa.

Remarks:—The Ms. is in a fairly good condition.

॥ व्याप्तिवादः ॥

6670. VYĀPTIVĀDAḤ.

Burnell's Catalogue No. 10948. Page 121. Right column. Substance—Palm leaf. Size—18½ × 1¾ inches. Leaves—17. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—258. Author—? Incomplete. Not Printed.

Beginning:

केयं व्याप्तिः । अनौपाधिकत्वं वा स्वाभाविकत्वं वा अव्यभिचारित्वं वा योऽन्येन सम्बन्धो वा साध्यसमानाधिकरणया सद्धर्मसमानाधिकरणसाध्यसमानाधिकरणं वा विशिष्टवैशिष्ट्यं वा तादात्म्यं ।

End:

गगनपरिमाणमादाय....विशेषस्य च धर्मे ग्राहक... तदवच्छेदकत्वेनैव सिद्धत्वात् । न ताभ्यां विनिगमनाविरहः । समवाये प्रमाणञ्च प्रत्यक्षमेव । इह तु...घटेन समवाय इति.... ।

Subject: Vyāptivāda.

Remarks:—The Ms. is in a fairly good condition.

॥ व्याप्तिवादः ॥

6671. VYĀPTIVĀDAḤ.

Burnell's Catalogue No. 10954. Page 121. Right column.

Substance—Palm leaf. Size—15¾ × 1¼ inches. Leaves—9. Lines—8 or 9 to a Page. Script—Grantha. No. of Granthas—210. Author—? Incomplete. Wants end. Not printed.

Beginning:

॥ व्याप्तिः ॥ अथ प्रत्यक्षोपजीव्यत्वात् प्रत्यक्षानन्तरं बहुवादिसंमतत्वात् उपमानात्प्रागनुमानं निरूप्यते । तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिः । तत्करणमनुमानम् । तच्च लिङ्गपरामर्शः ।

End:

तथापि च साध्यव्यापकत्वसाध्या...कत्वे तत्रस्त इति तद्व्यावृत्त्या पक्षे साध्यव्यावृत्तिः । अतो हेतोर्व्यभिचार एव । व्यभिचारे चावश्यमुपाधिरिति ।

Subject: Vyāptivāda.

Remarks:—The Ms. is in a fairly good condition. The works contained herein are:

1. Bhūyodarśanavāda and 2. Upādhivāda.

॥ व्याप्तिवादः ॥

6672. VYĀPTIVĀDAḤ.

J. L. Collection 926.

Substance—Paper. Size—6½ × 4 inches. Sheets—5. Lines—8 to a Page. Script—Devanāgarī. No. of Gran-

thas—60. Author—? Complete. Wants end. Not printed.

Beginning:

अथवेत्यादि मूलतो हेतुसमानाधिकरणाभावप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिरिति लक्ष्यते । अत्र च वह्निमान् धूमादित्येतद्व्यक्तिभावमादायाव्याप्तिमाशङ्क्य मुक्तावल्यामवच्छेदकगर्भलक्षणमनुससार ।

End:

वृत्त्यनियामकसंबन्धस्याभावप्रतियोगितानवच्छेदकतया तत्संबन्धस्य व्यापकताघटकत्वाभावेन वृत्तिनियामकसं... ।

Subject: Vyāptivāda.

Remarks:—The Ms. is in a fairly good condition.

॥ व्याप्तिविचारः ॥

6673. VYĀPTIVICĀRAḤ.

Burnell's Catalogue No. 10949a. Page 121. Right column Substance—Palm leaf. Size—15 × 1½ inches. Leaves—15. Lines—5 to a Page. Script—Grantha. No. of Granthas—150. Author—? Complete. Not printed.

Beginning:

साध्यवदन्यावृत्तित्वं व्याप्तिः । इदञ्च लक्षणं लक्ष्ये

वर्तते । पर्वतो वह्निमान् धूमादित्यादौ साध्यं वह्निः, तद्वान् महानसादिः, तदन्यो ह्रदादिः , तदवृत्तित्वं धूमस्येति लक्ष्ये लक्षणसमन्वयः ।

End:

साध्यताप्रयोजककालिकसम्बन्धावच्छिन्नत्वाभावेन साध्यताप्रयोजकसम्बन्धावच्छिन्नत्वसाध्यतावच्छेदकधर्मावच्छिन्नोभयाभावसत्त्वेनाव्याप्त्यनवकाशादिति संक्षेपः ॥

Subject. Vyāptivicāra

Remarks:—The Ms. is in a fairly good condition. The **other** work contained herein is:— घसंज्ञाविचारः

॥ शब्दस्वातन्त्र्यादिवादः ॥

6674. ŚABDASVĀTANTRYĀDIVĀDAḤ.

J. L. Collection No. 927.

Substance—Paper. Size—10 × 4¼ inches. Sheets—65. Lines—8-10 to a Page. Script—Devanāgarī. No. of Granthas—1600. Author—? Incomplete. Not printed.

Beginning:

श्रीगणाधिपतये नमः ।

श्रीमल्लक्ष्मीनृसिंहाय नमः ।

अथ शब्दो निरूप्यते....तु भूतार्थ तत्त्वज्ञानजन्यः

शब्द; प्रमाणं । न तु शब्दो न प्रमाणं । तथा हि करण-विशेषः प्रमाणं । करणं च तत् यस्मिन् सति क्रिया भवत्येव । न शब्दे सति प्रमा भवत्येवेति नायं प्रमाणम् ।

End:

अत एव न कलञ्जं भक्षयेदित्यत्र कलञ्जभक्षणं तृप्तिकामनया भक्षण प्रवृत्तस्य कृतिसाध्यत्वेनाप्तेच्छा विषयो नेति तस्येश्वरेच्छाविषयत्वेऽपि निषेध उपपद्यते अभि-प्रायःविधिपक्षे बलवदनिष्टानुबन्धित्वमानुमानिकमिति साधनताविधिपक्षे तत्र तदपि शक्यमिति गौरवमिति ॥

Colophon:

इति विधिवादः समाप्तः ।

Subject:
1 Śabdasvātantryavāda.
2 Ākāṅkṣāvāda.
3 Yogyatāvāda.
4 Āsattivāda.
5 Padādhyāhāravāda.
6 Tātparyavāda.
7 Nānārthavāda.
8 Vedāpauruṣeyavāda.
9 Varṇanityatvavāda.
10 Uchinnaśākhāvāda.
11 Vidhivāda.

Remarks:—The Ms. is in a fairly good condition. After the colophon is given:

अथ स्वर्ग कामो यजेतेत्यादौ... ॥

॥ शाब्दस्वातन्त्र्यवादः ॥

6675. ŚABDASVĀTANTRYAVĀDAḤ.

Burnell's Catalogue No. 2259. **Page** 120. Right column.

Substance—Paper. Size—$10 \times 4\frac{1}{4}$ inches. Sheets—7. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—230. Author—?. Incomplete. Not printed.

Beginning—Same as No. 6674.

End:

अत एव शाब्दबोधे न नियतहेतुत्वं तच्चेतरपदार्थसंसर्गज्ञानं वाक्यार्थज्ञानं वाक्यार्थज्ञानमेवेति सामान्याकारेण तात्पर्यग्रहे हेतुः। न तु विशिष्य। तच्च स्वपरार्थयोः संसर्गज्ञानजननं विना अनुपपन्नमिति पदानि संभूय जनयन्ति अत एव नानार्थे विनिगमना। तदनुपपत्तिरेव लक्षणाबीजम्। तदभावात्पचातिपदेन स्मृतकलायान्वयबोध इति सिद्धं शब्दस्य प्रमाणान्तरत्वम्।

Colophon:

इति शब्दस्वातन्त्र्यवादः समाप्तः ॥

Subject: Śabdasvātantryavāda.

Remarks:—The Ms. is in a fairly good condition. After the colophon the following is given

तस्य निराकाङ्क्षादौ + प्रतियोग्यताकाङ्क्षाजिज्ञा... ।

॥ शाब्दबोधः ॥

6676. ŚĀBDABODHAḤ.

Not noticed by Burnell Ms. No. 15563.

Substance—Paper. Size—$10\frac{1}{4} \times 4$ inches. Sheets—15. Lines—9 to a Page. Script—Grantha. No. of Granthas—455. Author—?. Incomplete. Not printed.

Beginning:

अथ गुणादिवाचकपदोत्तरद्विवचनबहुवचनयोः कथं द्वित्वबोधकता । संख्याया गुणत्वेन गुणादौ बाधात् । न च तत्र स्वाश्रयसमवेतत्वादिसम्बन्धे द्रव्यगतं द्वित्वादिकमेव भासत इति वाच्यम् ।

End:

उक्तयुक्त्या सम्बन्धघटकोपस्थितेरपि शाब्दबोधेऽपेक्षितत्वात् एकधर्मावच्छिन्नप्रतियोगिताया अन्यधर्मा... ।

Subject: Śābdabodha.

Remarks:—The Ms. is in a fairly good condition

॥ शारीरलक्षणम् ॥

6677. ŚĀRĪRALAKṢAṆAM.

Burnell's Catalogue No. 10967. Page 121. Right column.

Substance—Palm leaf. Size—$19 \times 1\frac{1}{2}$ inches. Leaves—66. Lines—5 to a Page. Script—Telugu. No. of

Granthas—960. Author—? Incomplete. Wants end. Not printed.

Beginning:

प्रमाणनिरूपणानन्तरं प्रमेयनिरूपणं क्रियते। एभिः प्रमाणैः प्रमातव्यस्य प्रमेयस्य किं लक्षणमित्युक्ते प्रमाविषयत्वम्म प्रमेयस्य लक्षणम् ॥

End

बहुत्वञ्च त्रिष्वेव पर्यवस्यति। कपिञ्जलाधिकरणन्यायात् तेनैव त्र्यणुकगतमहत्त्वोपपत्तेः।

Colophon (Leaf 21) इत्यात्मवादः। (Leaf 37) इति शरीरनिरूपणम्।

Subject: Śārīralakṣaṇa.

Remarks:—The Ms. is in a fairly good condition.

॥ संशयवादः ॥

6678. SAMŚAYAVĀDAḤ.

Burnell's Catalogue No. 2255. Page 120. Right column. Substance—Paper. Size—9¾ × 4½ inches. Sheets—46. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—820. Author—? Incomplete. Wants end. Not printed.

Beginning:

श्रीवेदव्यासाय नमः ॥

अस्तु या काचिद्व्याप्तिः। अथापि तन्निश्चयो न भूयः

सहचरादर्शनेन व्यभिचारिसाधारणत्वात् सहचारस्य व्यभिचार्यभिचारिसाधारणतया संशायकत्वाच्च तत्संशयसामग्र्यास्तन्निश्चयविरोधित्वात् ।

End.

तदन्यस्मिन् सम्बन्धायोगव्यवच्छेदश्च तदर्थ इत्यपि न युक्तम् । तथापि समभिव्याहृतपदार्थतावच्छेदकव्याप्यपेव सर्वत्र एवकारार्थः ॥

Subject: Saṁśayavāda.

Remarks.—The Ms. is in a fairly good condition.

॥ सामग्रीवादः ॥

6679. SĀMAGRĪVĀDAḤ.

Burnell's Catalogue No. 2248. Page 120. Left column. Substance—Paper. Size—7⅝ × 3 inches. Sheets—10. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—202. Author—Timmaṇācārya ? Incomplete. Wants end. Not printed.

Beginning:

समानविषये एकदा लौकिकप्रत्यक्षसामग्रीसत्त्वेऽनुमितिसामग्रीसत्त्वे लौकिकप्रत्यक्षमेवोत्पद्यते । तदनन्तरं साक्षात्करोमीत्यनुव्यवसायस्य अनुभवसिद्धत्वादिति । तदानुमित्यनुत्पादनिर्वाहार्थं समानविषये अनुमितिप्रतिलौकिकप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वं कल्पनीयम् । अथा-

नानुमितिलौकिकप्रत्यक्षसामग्र्योः केन रूपेण प्रतिबध्य-प्रतिबन्धकभावः ।

End:

मुख्यविशेष्यतात्वश्चप्रकारतादिसांसर्गिकभिन्नविषयतात्वम् । अतो न पटघटत्वादिनिर्विकल्पकासङ्ग्रहः । अनुमित्साविशिष्टानुमितिसामग्रीकाले [वह्नि]वह्नित्वादिनिर्विकल्पानङ्गीकारेणानुपपत्त्यभावात् ॥

Subject: Sāmagrīvāda.

Remarks:—The Ms. is in a fairly good condition.

॥ सामान्यनिरुक्तिक्रोडपत्रम् ॥

6680. SĀMĀNYANIRUKTIKROḌAPATRAM.

N. S. Collection No. 85 a

Substance—Paper. Size—12¼ × 4 inches. Sheets—5. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—? Incomplete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

बाधविशिष्टव्यभिचारस्य स्वावच्छिन्नाविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूतयत्किञ्चिद्विषयकत्वं यादृशधर्मावच्छिन्नानिरूपितं तादृशधर्मावच्छिन्नाविषयकप्रतीतिविषयत्वमिति लक्षणे बाधविशिष्ट-

व्यभिचारे भट्टाचार्येण लिखितम् । इदमत्रावधेयम् ॥

End:

पर्वतीयवन्हिव्यभिचारो न दोषाय न वा तत्संबन्धेन तत्र स तस्य हेतोर्दुष्टत्वं अतः... ।

Subject: Sāmānyaniruktikroḍapatra.

Remarks:– The Ms. is in a fairly good condition.

॥ सामान्याभावखण्डनम् ॥

6681. SĀMĀNYĀBHĀVAKHAṆḌANAM.

N. S. Collection No. 89.

Substance—Paper. Size—12 × 3¾ inches. Sheets—11. Lines—12 to a Page. Script—Grantha. No. of Granthas —500. Author—? Complete. Not printed.

Beginning:

शुभम् ॥

यत्र वाचस्पतिर्वेत्ति न वेत्ति विचिकित्सते ।
विषये दृश्यते तत्र कथा का तस्य दुर्मतेः ॥ १ ॥

मा बध्नीत नयद्वारे सामान्याभावसिन्धुरम् ।
युक्त्यभाववृकश्रेण्या व्रजेदामिषतां क्षणात् ॥ २ ॥

अत्र सामान्याभावोऽतिरिक्त(इति)नव्याः । विशेषाभावकूट एवेति प्राञ्चः । तत्र विप्रतिपत्तिः । एतद्घटरूपान्तरप्रतियोगिकाभावप्रतियोगि न वा । एतद्रूपभिन्न एतद्रूपाभावप्रतियोगि न वा । घटत्वरूपघटत्वादिकं स्वन्यूनधर्मावच्छिन्नप्रतियोगितावच्छेदकं न वेत्यादि ।

End:

अभावसामान्यन्तु विशेषाभावकूटात्मकमित्यस्यार्थादेव सिद्धत्वात् कथमप्यभावस्थले सामान्यविशेषयोर्भेदासिद्धिप्रत्याशेऽपि निगूढतरमपूर्वप्रत्यक्षोपस्थापनकुशलमन्त्रेण वादिनोऽभिनन्दनीया इति ।

Colophon:

शुभमस्तु ॥ सामान्याभावखण्डनं समाप्तम् ॥

Subject: Sāmānyābhāvakhaṇḍana.

Remarks:—The Ms. is in a fairly good condition.

॥ सिद्धान्तसंग्रहः ॥

6682. SIDDHĀNTASAṄGRAHAḤ.

N. S. Collection No. 26.

Substance—Paper. Size—9¾ × 4¼ inches. Sheets—20. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—475. Author—? Incomplete. Wants end. Not printed.

Beginning:

